72. तत्रैवं स्थिते सति तुट्यर्धद्वयमध्यादामावस्यं पूर्वमर्धम् अर्थात्परस्मिन्प्रातिपदेऽर्धे वक्ष्यमाणादृण शब्दाभिधेयात् तिथिच्छेदाद्विशत् सत् सूर्यग्रहणं कुर्यात्, प्रतिपदमावास्यासंघट्टात्सूर्यग्रहणं भवेत्। विवेक, आं. 6 पृ. 86-87.

73. पक्षसन्धि सूर्य का ग्रहण तथ. उसकी मुक्ति के सम्बन्ध में स्वतं 7.69-72 द्रष्टव्य है।

74. प्राणार्कमानहठघट्टितमेयचन्द्रविद्राविताभृतरसोत्सुकितः खमाता।
स्वर्भानुरावृणुत एव रविं रसं तु पुण्ये ग्रहेऽत्र रसयेत्त्रयघट्टनज्ञः।।
विवेक, आ. 6, पृ. 89 में उद्धृत

75. पूर्णिमाप्रतिपत्संभेदेनैवन्दुग्रहो भवेत् न तु शुद्धायामेव प्रतिपद्यपि। विवेक, पृ. 97

76. द्रष्टव्य-स्वतं, 7.94 तथा मन्त्रा, 6.115 का सटिप्पण अनुवाद.

77. षडंगुलं च संक्रामो मकरादिषु राशिषु।
भानोर्माद्याषाढान्तं भवेत्तच्चोत्तरायणम्।। विवेक, ओ. 6, 98 में उद्धृत।

78. प्रत्येक राशि में संक्रान्ति के अलग-अलग फल तथा उनके अवान्तर भेद के लिए द्रष्टव्य - तन्त्रा, 6.117-120 का सटिप्पण अनुवाद।

79. एक मास का उदय छह अंगुल का होता है, प्रत्येक अंगुल में पाँच तिथियाँ होती हैं, इस प्रकार छह अंगुलों में तीस तिथियाँ होती हैं तथा प्रत्येक अंगुल के पाँचवे अंश में अहोरात्र होता है अर्थात् अंगुल के एक दशांश में दिन और एक दशांश में रात होती है। द्रष्टव्य-तन्त्रा, 6.121 तथा स्वतं, 7.91.

80. द्रष्टव्य-6.122-23 का सटिप्पण अनुवाद।

81. संक्रान्तयो द्वादशान्ते यद्वदब्दे प्रकीर्तिताः। द्वादशाब्दोदयं प्राणे वत्सरास्ते प्रकीर्तिताः।। स्वतं, 7.126.

82. प्रत्यंगुलं तिथीनां तु त्रिशते परिकल्पिते। सपंचांशांगुलेऽब्दः स्यात्प्राणे षष्ट्यब्दता पुनः।। तन्त्रा, 6.126.

83. विंशतिस्तु सहस्राणि सहस्रं षट्शताधिकम्। अहोरात्रास्तु षष्ट्यब्दे संख्यातास्तु वरानने।। स्वतं, 7.136.

84. अन्तर्या षष्ट्यब्दोदये तिथिसंख्या तद्बहिर्दिनरात्रं प्राणचारकल्पनम्।
तन्त्रसार, पृ. 53 पर पाद टिप्पणी सं. 35.

85. यन्नाम हि नित्यनैमित्तिकादि बाह्ये प्रयत्नशतैरपि पुरुषायुषेण निष्पत्तिं यायात् न वा, तदन्तरेकस्मिन्नेव प्राणचारे प्रहराहर्निशादिक्रमेण क्षणमात्रमवधानात्सुखमेव योगिनः सिध्येत्। विवेक, आ. 6, पृ. 110.

86. न षष्ट्यब्दोदयादधिकं परीक्ष्यते आनन्त्यात्। तन्त्रसार, पृ. 53.

87. इस सम्पूर्ण प्रसङ्ग के लिए द्रष्टव्य विवेक, आ. 6, पृ. 111-14.

88. श्रीमत्स्वच्छन्दशास्त्रे च तदैव मतमीक्ष्यते। 6.136.

89. उक्तं च गुरुभिः श्रीमद्रौरवादिस्ववृत्तिषु। 6.134.

90. (क) यत् पित्र्यं वर्षं तदेव दिव्यमुच्यते, येन पित्रॄणां देवानामपि अहोरात्रादि समानमेवेति भावः। विवेक, आ. 6, पृ. 115.

(ख) एवं पित्र्यं वर्षं देवानां दिनमिति यदन्यैरुक्तं तदयुक्तमेव। वही, पृ. 119.

91. चौदह मन्वन्तरों के अधिष्ठाता मनु हैं: स्वायम्भुव, स्वारोचिष, औत्तम, चैरिष्णव या रैवत, तामस, चाक्षुष, वैवस्वत, सावर्णि, दक्षसावर्णि, धर्मसावर्णि, रुद्रसावर्णि, रौच्य, मौत्य। छह मन्वन्तर समाप्त हो चुके हैं तथा वर्तमान में वैवस्वत मन्वन्तर है। युगों, मन्वन्तरों तथा कल्पों के लिये द्रष्टव्य-मनुस्मृति, 1.69-71.

92. द्रष्टव्य - स्वतं, 11.309.

93. तन्त्रसार, पृ. 56 में मध्य से पूर्व अन्त्य को लिखा है: अन्त्यं, मध्यं, परार्ध ....

94. तुलना के लिये द्रष्टव्य - डॉ. कुमारकिशोर मण्डल, A Comparative study of the Concepts of space and time in Indian Thought P. 32-39 तथा ज्योतिषशास्त्र के अनुसार काल के विभागों के विवेचन के लिए द्रष्टव्य - B.N.Sil, The Positive sciences of the encient Hindus P. 76-80 मोतीलाल बनारसीदास, दिल्ली, 1958.

95. चत्वार एते प्रलया मुख्याः सर्गाश्च तत्कलाः।
भूमूलनैशशक्तिस्थास्तदेवाण्डचतुष्टयम्।। तन्त्रा, 6.170 तथा द्रष्टव्य, पसा, श्लोक, 4.

96. शश्वद्यद्यप्यपानोऽयमित्थं वहति किन्त्वसौ।
अवेद्ययत्नो यत्नेन योगिभिः समुपास्यते।। तन्त्रा, 6.187-88.

97. स्वत, 7.16.

98. इन दश मुख्य नाड़ियों के अवान्तर भेद 72000 बताये गये हैं :
द्वासप्ततिसहस्राणि नाड्यस्ताभ्यो विनिर्गताः।
पुनर्विनिर्गताश्चान्या आभ्योऽप्यन्याः पुनः पुनः।। वही, 7.9.

99. छह प्राण का एक चषक होता है तथा 60 चषकों की एक घटिका होती है इस प्रकार एक घटिका में (6x60=360) प्राणचार होते हैं।

100. द्रष्टव्य-स्वतं, 7.163.

101. तेन पंचत्रिंशद्घटिके दिने चतुर्दशसंक्रान्तयः, पंचविंशतिघटिकायां रात्रौ दशेति। विवेक, आ.6, पृ.173.

102. इह तावत्प्राणचारे वर्णानां पदानां मन्त्राणां चोदय इति स्थितम्। स तु द्विधा स्वारसिकः प्रायत्निकश्चेति। तत्राद्यो वर्णानां तेषां नैयत्येन सर्वत्रैवाविशेषात्, द्वितीयस्तु पदानां मन्त्राणां च, ते हि वर्णवदपरिगणि-तत्वादनियताः, इति योगीच्छानिबन्धन एवैषामुदयः। यो हि यस्याभिप्रेतो मन्त्रादिः स तस्योदयं कारयेत्, अतश्च परेच्छाधीनत्वादेषां प्रायत्निक एवोदयः। विवेक, 6 पृ. 177

103. इत्ययत्नजमाख्यातं यत्नजं तु निगद्यते। तन्त्रा, 7.2.

104. क वर्ग अकार के भीतर स्थित है, इकार के भीतर च वर्ग तथा यकार, शकार स्थित हैं। क्रमशः प्राणरूप तथा जीवनरूप होने के कारण सकार का उदय हृदय में तथा इकार का सर्वत्र उदय माना गया है। द्रष्टव्य - तन्त्रा, 6.222-23.

105. सूक्ष्मसूक्ष्म के लिये तन्त्रा, 6.224, स्थूलसूक्ष्म के लिये 6.225-37, तथा सूक्ष्मपर के लिये 6.238-39 का सटिप्पण अनुवाद द्रष्टव्य है।

106. कादीनां त्रयस्त्रिंशदर्धमात्राः, ह्रस्वानां दश, दीर्घाणां द्वात्रिंशत् प्लुतस्य षडित्येकाशीतिरर्धमात्राणाम्। विवेक, आ. 6, पृ. 184.

107. द्रष्टव्य - तन्त्रा, 6.229-30।

■

द्वितीय खण्ड

चतुर्थ परिच्छेद

(अ) चतुर्थ आह्निक का मूलपाठ

अथ शाक्तमुपायमण्डलं कथयामः परमात्मसंविदे।।1।।
अनन्तराह्निकोक्तेऽस्मिन्स्वभावे पारमेश्वरे।
प्रविविक्षुर्विकल्पस्य कुर्यात्संस्कारमञ्जसा।।2।।
विकल्पः संस्कृतः सूते विकल्पं स्वात्मसंस्कृतम्।
स्वतुल्यं सोऽपि सोऽप्यन्यं सोऽप्यन्यं सदृशात्मकम्।।3।।
चतुर्ष्वेव विकल्पेषु यः संस्कारः क्रमादसौ।
अस्फुटः स्फुटताभावी प्रस्फुटन्स्फुटितात्मकः।।4।।
ततः स्फुटतरो यावदन्ते स्फुटतमो भवेत्।
अस्फुटादौ विकल्पे च भेदोऽप्यस्त्यान्तरालिकः।। 5।।
ततः स्फुटतमोदारताद्रूप्यपरिबृंहिता।
संविदभ्येति विमलामविकल्पस्वरूपताम्।।6।।
अतश्च भैरवीयं यत्तेजः संवित्स्वभावकम्।
भूयो भूयो विमृशतां जायते तत्स्फुटात्मता।।7।।
ननु संवित्पराम्रष्ट्री परामर्शमयी स्वतः।
परामृशा कथं ताथारूप्यसृष्टौ तु सा जडा।।8।।
उच्यते स्वात्मसंवित्तिः स्वभावादेव निर्भरा।
नास्यामपास्यं नाधेयं किञ्चिदित्युदितं पुरा।। 9।।
किं तु दुर्घटकारित्वात्स्वाच्छन्द्यान्निर्मलादसौ।
स्वात्मप्रच्छादनक्रीडापण्डितः परमेश्वरः।।10।।
अनावृत्ते स्वरूपेऽपि यदात्माच्छादनं विभोः।
सैव माया यतो भेद एतावान्विश्ववृत्तिकः।।11।।

तथाभासनमेवास्य द्वैतमुक्तं महेशितुः।
तद्द्वयापासनेनायं परामर्शोऽभिधीयते। ।।12।।
दुर्भेदपादपस्यास्य मूलं कृन्तन्ति कोविदाः।
धारारूढेन सत्तर्ककुठारेणेति निश्चयः।।13।।
तामेनां भावनामाहुः सर्वकामदुधां बुधाः।
स्फुटयेद्वस्तु यापेतं मनोरथपदादपि।।14।।
श्रीपूर्वशास्त्रे तत्प्रोक्तं तर्को योगाङ्गमुत्तमम्।
हेयाद्यालोचनात्तस्मात्तत्र यत्नः प्रशस्यते।।15।।
मार्गे चेतः स्थिरीभूतं हेयेऽपि विषयेच्छया।
प्रेर्य तेन नयेत्तावद्यावत्पदमनामयम्।।16।।
मार्गोऽत्र मोक्षोपायः स हेयः शास्त्रान्तरोदितः।
विषिणोति निबध्नाति येच्छा नियतिसङ्गतम्।।17।।
रागतत्त्वं तयोक्तं यत् तेन तत्रानुरज्यते।
यथा साम्राज्यसंभोगं दृष्ट्वाष्ट्वथवाधमे।।18।।
भोगे रज्येत दुर्बुद्धिस्तद्वन्मोक्षेऽपि रागतः ।
स एवांशक इत्युक्तः स्वभावाख्यः स तु स्फुटम।।19।।
सिद्ध्यङ्गमिति मोक्षाय प्रत्यूह इति कोविदाः।
शिवशासनमाहात्म्यं विदन्नप्यत एव हि।।20।।
वैष्णवाद्येषु रज्येत मूढो रागेण रञ्जितः।
यतस्तावति सा तस्य वामाख्या शक्तिरैश्वरी।।21।।
पाञ्चरात्रिकवैरिञ्च सौगतादेर्विजृम्भते।
दृष्टः साम्राज्यसंभोगं निन्दन्तः केऽपि वालिशाः।।22।।
न तु संतोषतः स्वेषु भोगेष्वाशीः प्रवर्तनात्।
एवं चिद्भैरवावेशनिन्दातत्परमानसाः।।23।।
भवन्त्यतिसुघोराभिः शक्तिभिः पातिता यतः।
तेन शांभवमाहात्म्यं जानन्यः शासनान्तरे।।24।।
आश्वस्तो नोत्तरीतव्यं तेन भेदमहार्णवात्।
श्रीकामिकायां प्रोक्तं च पाशप्रकरणे स्फुटम्।।25।।
वेदसांख्यपुराणज्ञाः पाञ्चरात्रपरायणाः।
ये केचिदृषयो धीराःशास्त्रान्तरपरायणाः।।26।।

बौद्धार्हताद्याः सर्वे ते विद्यारागेण रञ्जिताः।
मायापाशेन बद्धत्वाच्छिवदीक्षां न विन्दते।।27।।
रागशब्देन च प्रोक्तं रागतत्त्वं नियामकम्।
मायीये तच्च तं तस्मिञ्छास्त्रे नियमयेदिति।।28।।
मोक्षोऽपि वैष्णवादेर्यः स्वसङ्कल्पेन भावितः।
परप्रकृतिसायुज्यं यद्वाप्यानन्दरूपता।।29।।
विशुद्धचित्तमात्रं वा दीपवत्संततिक्षयः।
स सवेद्यापवेद्यात्मप्रलयाकलतामयः।।30।।
तं प्राप्यापि चिरं कालं तद्भोगाभोगभुक्ततः।
तत्तत्त्वप्रलयान्ते तु तदूर्ध्वां सृष्टिमागतः।।31।।
मन्त्रत्वमेति संबोधादनन्तेशेन कल्पितात्।
एतच्चाग्रे तनिष्याम इत्यास्तां तावदत्र तत्। (32)
तेनाज्ञजनताक्लृप्तप्रवादैर्यो विडम्बितः।
असद्गुरौ रूढचित् स मायापाशेन रञ्जितः।।33।।
सोऽपि सत्तर्कयोगेन नीयते सद्गुरुं प्रति।
सत्तर्कः शुद्धविद्यैव सा चेच्छा परमेशितुः।।34।।
श्रीपूर्वशास्त्रे तेनोक्तं स यियायुः शिवेच्छया।
भुक्तिमुक्तिप्रसिद्ध्यर्थं नीयते सद्गुरुं प्रति।।35।।
शक्तिपातस्तु तत्रैष क्रमिकः संप्रवर्तते।
स्थित्वा योऽसद्गुरौ शास्त्रान्तरे वा सत्पथं श्रितः।।36।।
गुरुशास्त्रगते सत्त्वेऽसत्त्वे चात्र विभेदकम्।
शक्तिपातस्य वैचित्र्यं पुरस्तात्प्रविविच्यते।।37।।
उक्तं स्वच्छन्दशास्त्रे तत् वैष्णवाद्यान्प्रवादिनः।
सर्वान्भ्रमयते माया सा मोक्षे मोक्षलिप्सया।।38।।
यस्तु रूढोऽपि तत्रोद्यत्परामर्शविशारदः।
स शुद्धविद्यामाहात्म्याच्छक्तिपातपवित्रितः।।39।।
आरोहत्येव सन्मार्गं प्रत्यूहपरिवर्जितः।
स तावत्कस्यचित्तर्कः स्वत एव प्रवर्तते।।40।।
स च सांसिद्धिकः शास्त्रे प्रोक्तः स्वप्रत्ययात्मकः।
किरणायां यदप्युक्तं गुरुतः शास्त्रतः स्वतः।।41।।

तत्रोत्तरोत्तरं मुख्यं पूर्वपूर्व उपायकः।
यस्य स्वतोऽयं सत्तर्कः सर्वत्रैवाधिकारवान्।।42।।
अभिषिक्तः स्वसंवित्तिदेवीभिर्दीक्षितश्च सः।
स एव सर्वाचार्याणां मध्ये मुख्यः प्रकीर्तितः।।43।।
तत्संनिधाने नान्येषु कल्पितेष्वधिकारिता।
स समस्तं च शास्त्रार्थं सत्तर्कादेव मन्यते।।44।।
शुद्धविद्या हि तन्नास्ति सत्यं यद्यन्न भासयेत्।
सर्वशास्त्रार्थवेतृत्वमकस्माच्चास्य जायते।।45।।
इति श्रीपूर्ववाक्ये तद् अकस्मादिति-शब्दतः।
लोकाप्रसिद्धो यो हेतुः सोऽकस्मादिति कथ्यते।।46।।
स चैष परमेशानशुद्धविद्याविजृम्भितम्।
अस्य भेदाश्च बहवो निर्भित्तिः सहभित्तिकः।।47।।
सर्वगोंऽशगतः सोऽपि मुख्यामुख्यांशनिष्ठितः।
भित्तिः परोपजीवित्वं परा प्रज्ञाथ तत्कृतिः।।48।।
अदृष्टमण्डलोऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः।
स सिद्धिभाग्भवेन्नित्यं स योगी स च दीक्षितः।।49।।
एवं यो वेत्ति तत्त्वेन तस्य निर्वाणगामिनी ।
दीक्षा भवेदिति प्रोक्तं तच्छ्रीत्रिंशकशासने।।50।।
अकल्पितो गुरुर्ज्ञेयः सांसिद्धिक इति स्मृतः।
यस्तु तद्रूपभागात्मभावनातः परं विना।।51।।
शास्त्रवित्स गुरुः शास्त्रे प्रोक्तोऽकल्पितकल्पकः।
तस्यापि भेदा उत्कृष्टमध्यमन्दाद्युपायतः।।52।।
भावनातोऽथ वा ध्यानाज्जपात्स्वप्नाद्व्रताद्धुतेः।
प्राप्नोत्यकल्पितोदारमभिषेकं महामतिः।।53।।
श्रीमद्वाजसनीये श्रीवीरे श्रीब्रह्मयामले।
श्रीसिद्धायामिदं धात्रा प्रोक्तमन्यत्र च स्फुटम्।।54।।
तस्य स्वेच्छाप्रवृत्तत्वात् कारणानन्ततेष्यते।
कदाचिद्भक्तियोगेन कर्मणा विद्ययापि वा।।55।।
ज्ञानधर्मोपदेशेन मन्त्रैर्वा दीक्षयापि वा।
एवमाद्यैरनेकैश्च प्रकारैः परमेश्वरः।।56।।

संसारिणोऽनुगृह्णाति विश्वस्य जगतः पति।
मातृमण्डलसंबोधात् संस्कारात्तपसः प्रिये।।57।।
ध्यानाद्योगाज्जपाज्ज्ञानान्मन्त्राराधनतो व्रतात्।
संप्राप्यं कुलसामान्यं ज्ञानं कौलिकसिद्धिदम्।।58।।
तत्त्वज्ञानात्मकं साध्यं यत्र यत्रैव दृश्यते।
स एव हि गुरुस्तत्र हेतुजालं प्रकल्प्यताम्।।59।।
तत्त्वज्ञानादृते नान्यल्लक्षणं ब्रह्मयामले।
तत्रैव चोक्तं सेवायां कृतायामविकल्पतः।।60।।
साधकस्य न चेत्सिद्धिः किं कार्यमिति चोदिते।
आत्मीयमस्य संज्ञानक्रमेण स्वात्मदीक्षणम् ।।61।।
सस्फुरत्वप्रसिद्ध्यर्थं ततः साध्यं प्रसिद्ध्यति।
अनेन स्वात्मविज्ञानं सस्फुरत्वप्रसाधकम्।।62।।
उक्तं मुख्यतयाचार्यो भवेद्यदि न सस्फुरः।
तत्रैव च पुनः श्रीमद्रक्ताराधनकर्मणि।।63।।
विधिं प्रोक्तं सदा कुर्वन् मासेनाचार्य उच्यते।
पक्षेण साधकोऽर्धार्धात् पुत्रकः समयी तथा।।64।।
दीक्षयेज्जपयोगेन रक्तादेवी क्रमाद्यतः।
गुरोरलाभे प्रोक्तस्य विधिमेतं समाचरेत्।।65।।
मते च पुस्तकाद्विद्याध्ययने दोष ईदृशः।
उक्तो यस्तेन तद्दोषाभावेऽसौ न निषिद्धता।।66।।
मन्त्रद्रव्यादिगुप्तत्वे फलं किमिति चोदिते।
पुस्तकाधीतविद्या ये दीक्षासमयवर्जिताः।।67।।
तामसाः परहिंसादि वश्यादि च चरन्त्यलम्।
न च तत्त्वं विदुस्तेन दोषभाज इति स्फुटम्।।68।।
पूर्वं पदयुगं वाच्यमन्योन्यं हेतुहेतुमत्।
यस्तु शास्त्रं विना नैति शुद्धविद्याख्यसंविदम्।।69।।
गुरोः स शास्त्रमन्विच्छुस्तदुक्तं क्रममाचरेत्।
येन केनाप्युपायेन गुरुमाराध्य भक्तितः।।70।।
तद्दीक्षाक्रमयोगेन शास्त्रार्थं वेत्त्यसौ ततः।
अभिषेकं समासाद्य यो भवेत्स तु कल्पितः।।71।।

सन्नप्यशेषपाशौघविनिवर्तनकोविदः।
यो यथाक्रमयोगेन कस्मिंश्चिच्छास्त्रवस्तुनि।।72।।
आकस्मिकं व्रजेद्बोधं कल्पिताकल्पितो हि सः।
तस्य योऽकल्पितो भागः स तु श्रेष्ठतमः स्मृतः।।73।।
उत्कर्षः शुद्धविद्यांशतारतम्यकृतो यतः।
यथा भेदेनादिसिद्धाच्छिवान्मुक्तशिवा ह्यधः।।74।।
तथा सांसिद्धिकज्ञानादाहृतज्ञानिनोऽधमाः।
तत्संनिधौ नाधिकारस्तेषां मुक्तशिवात्मवत्।।75।।
किं तु तूष्णीं-स्थितिर्यद्वा कृत्यं तदनुवर्तनम्।
यस्त्वकल्पितरूपोऽपि संवाददृढताकृते।।76।।
अन्यतो लब्धसंस्कारः स साक्षाद्भैरवो गुरुः।
यतः शास्त्रक्रमात्तज्ज्ञगुरुप्रज्ञानुशीलनात्।।77।।
आत्मप्रत्ययितं ज्ञानं पूर्णत्वाद्भैरवायते।
तेन श्रीकिरणोक्तं यदुरुतः शास्त्रतः स्वतः।।78।।
त्रिप्रत्ययमिदं ज्ञानमिति यच्च निशाटने।
तत्सङ्घातविपर्यासविग्रहैर्भासते तथा।।79।।
करणस्य विचित्रत्वाद्विचित्रामेव तां छिदम।
कर्तुं वासीं च टङ्कं च क्रकचं चापि गृह्णते।।80।।
तावच्च छेदनं ह्येकं तथैवाद्याभिसंधितः।
इत्थमेव मितौ वाच्यं करणस्य स्वकं वपुः।।81।।
न स्वतन्त्रं स्वतो मानं कुर्यादधिगमं हठात्।
प्रमात्राश्वासपर्यन्तो यतोऽधिगम उच्यते।।82।।
आश्वासश्च विचित्रोऽसौ शक्तिपातवशात्तथा।
प्रमितेऽपि प्रमाणानामवकाशोऽस्त्यतः स्फुटः।।83।।
दृष्ट्वा दृष्टवा समाश्लिष्य चिरं सञ्चर्व्य चेतसा।
प्रिया यैः परितुष्येत किं ब्रूमः किल तान्प्रति।।84।।
इत्थं च मानसंप्लुत्यामपि नाधिगते गतिः।
न व्यर्थता नानवस्था नान्योन्याश्रयतापि च।।85।।
एवं योगाङ्गमियति तर्क एव न चापरम्।
अन्तरन्तः परामर्शपाटवातिशयाय सः।।86।।

अहिंसा सत्यमस्तेयब्रह्मचर्यापरिग्रहाः।
इति पञ्च यमाः साक्षात्संवित्तौ नोपयोगिनः।।87।।
तपः प्रभृतयो ये च नियमा यत्तथासनम्।
प्राणायामाश्च ये सर्वमेतद्बाह्यविजृम्भितम्।।88।।
श्रीमद्वीरावलौ चोक्तं बोधमात्रे शिवात्मके।
चित्तप्रलयबन्धेन प्रलीने शशिभास्करे।।89।।
प्राप्ते च द्वादशे भागे जीवादित्ये स्वबोधके।
मोक्षः स एव कथितः प्राणायामो निरर्थकः।।90।।
प्राणायामो न कर्तव्यः शरीरं येन पीड्यते।
रहस्यं वेत्ति यो यत्र स मुक्तः स च मोचकः।।91।।
प्रत्याहारश्च नामायमर्थेभ्योऽक्षधियां हि यः।
अनिबद्धस्य बन्धस्य तदन्तः किल कीलनम्।।92।।
चित्तस्य विषये क्वापि बन्धनं धारणात्मकम्।
तत्सदृग्ज्ञानसंतानो ध्यानमस्तमिता परम्।।93।।
यदा तु ज्ञेयतादात्म्यमेव संविदि जायते।
ग्राह्यग्रहणताद्वैतशून्यतेयं समाहितिः।।94।।
तदेषा धारणाध्यानसमाधित्रितयी पराम्।
संविदं प्रति नो कञ्चिदुपयोगं समश्नुते।।95।।
योगाङ्गता यमादेस्तु समाध्यन्तस्य वर्ण्यते।
स्वपूर्वपूर्वोपायत्वादन्त्यतर्कोपयोगतः।।96।।
अन्तः संविदि रूढं हि तद्द्वारा प्राणदेहयोः।
बुद्धौ वार्प्यं तदभ्यासान्नैष न्यायस्तु संविदि।।97।।
अथ वास्मदृशि प्राणधीदेहादेरपि स्फुटम्।
सर्वात्मकत्वात्तत्रस्थोऽप्यभ्यासोऽन्यव्यपोहनम्।।98।।
देह उत्प्लुतिसंपात धर्मोज्जिगमिषारसात्।
उत्प्लाव्यते तद्विपक्षपाताशङ्कव्यपोहनात्।।99।।
गुरुवाक्यपरामर्शसदृशे स्वविमर्शने।
प्रबुद्धे तद्विपक्षाणां व्युदासः पाठचिन्तने।।100।।
नह्यस्य गुरुणा शक्यं स्वं ज्ञानं शब्द एव वा।
धियि रोपयितुं तेन स्वप्रबोधक्रमो ध्रुवम्।।101।।

अत एव स्वप्नकाले श्रुते तत्रापि वस्तुनि।
तादात्म्यभावनायोगो न फलाय न भण्यते।।102।।
सङ्केतानादरे शब्दनिष्ठामामर्शनं पठिः।
तदादरे तदार्थस्तु चिन्तेति परिचर्च्यताम्।।103।।
तदद्वयायां संवित्तावभ्यासोऽनुपयोगवान्।
केवलं द्वैतमालिन्यशङ्कानिर्मूलनाय सः।।104।।
द्वैतशङ्काश्च तर्केण तर्क्यन्त इति वर्णितम्।
तत्त्वर्कसाधनायास्तु यमादेरप्युपायता।।105।।
उक्तं श्रीपूर्वशास्त्रे च न द्वैतं नापि चाद्वयम्।
लिङ्गपूजादिकं सर्वमित्युपक्रम्य शम्भुना।।106।।
विहितं सर्वमेवात्र प्रतिषिद्धमथापि वा।
प्राणायामादिकैरङ्गैर्योगाः स्युः कृत्रिमा यतः।।107।।
तत्तेनाकृतकस्यास्य कलां नार्हन्ति षोडशीम्।
किं त्वेतदत्र देवेशि नियमेन विधीयते।।108।।
तत्त्वे चेतः स्थिरं कार्यं तच्च यस्य यथास्त्विति।
एवं द्वैतपरामर्शनाशाय परमेश्वरः।।109।।
क्वचित्स्वभावममलमामृशन्ननिशं स्थितः।
यः स्वभावपरामर्श इन्द्रियार्थाद्युपायतः।।110।।
विनैव तन्मुखोऽन्यो वा स्वातन्त्र्यात्तद्विकल्पनम्।
तच्च स्वच्छस्वतन्त्रात्मरत्ननिर्भासिनि स्फुटम्।।111।।
भावौघे भेदसंधातृ स्वात्मनो नैशमुच्यते।
तदेव तु समस्तार्थनिर्भरात्मैकगोचरम्।।112।।
शुद्धविद्यात्मकं सर्वमेवेदमहमित्यलतम्।
इदं विकल्पनं शुद्धविद्यारूपं स्फुटात्मकम्।।113।।
प्रतिहन्तीह मायीयं विकल्पं भेदभावकम्।
शुद्धविद्यापरामर्शो यः स एव त्वनेकधा।।114।।
स्नानशुद्ध्यर्चनाहोमध्यानजप्यादियोगतः।
विश्वमेतत्स्वसंवित्तिरसनिर्भरितं रसात्।।115।।
आविश्य शुद्धो निखिलं तर्पयेदध्वमण्डलम्।
उल्लासिबोधहुतभुग्दग्धविश्वेन्धनोदिते।।116।।

सितभस्मनि देहस्य मज्जनं स्नाननमुच्यते।
इत्थं च विहितस्नानस्तर्पितानन्तदेवतः।।117।।
ततोऽपि देहारम्भीणि तत्त्वानि परिशोधयेत्।
शिवात्मकेष्वप्येतेषु बुद्धिर्या व्यतिरेकिणी।।118।।
सैवाशुद्धिः पराख्याता शुद्धिस्तद्धीविमर्दनम्।
एवं स्वदेहं बोधैकपात्रं गलितभेदकम्।।119।।
पश्यन्संवित्तिमात्रत्वे स्वतन्त्रे तिष्ठति प्रभुः।
यत्किञ्चिन्मानसाह्लादि यत्र क्वापीन्द्रियस्थितौ।।120।।
योज्यते ब्रह्ममसद्धाम्नि पूजोपकरणं हि तत्।
पूजा नाम विभिन्नस्य भावौघस्यापि सङ्गतिः।।121।।
स्वतन्त्रविमलानन्तभैरवीयचिदात्मना।
तथाहि संविदेवेयमन्तर्बाह्योभयात्मना।।122।।
स्वातन्त्र्याद्वर्तमानैव परामर्शस्वरूपिणी।
स च द्वादशधा तत्र सर्वमन्तर्भवेद्यतः।।123।।
सूर्य एव हि सोमात्मा स च विश्वमयः स्थितः।
कलाद्वादशकात्मैव तत्संवित्परमार्थतः।।124।।
सा च मातरि विज्ञाने माने करणगोचरे।
मेये चतुर्विधं भाति रूपमाश्रित्य सर्वदा।।125।।
शुद्धसंविन्मयी प्राच्ये ज्ञाने शब्दनरूपिणी।
करणे ग्रहणाकारा यतः श्रीयोगसञ्चरे।।126।।
ये चक्षुर्मण्डले श्वेते प्रत्यक्षे परमेश्वरि।
षोडशारं द्वादशारं तत्रस्थं चक्रमुत्तमम्।।127।।
प्रतिवारणवद्रक्ते तद्बहिर्ये तदुच्यते।
द्वितीयं मध्यगे ये ते कृष्णश्वेते च मण्डले।।128।।
तदन्तर्ये स्थिते शुद्धे भिन्नाञ्जनसमप्रभे।
चतुर्दले तु ते ज्ञेये अग्नीषोमात्मके प्रिये।।129।।
मिथुनत्वे स्थिते ये च चक्रे द्वे परमेश्वरि।
संमिलनोन्मीलनं ते अन्योन्यं विदधातके।।130।।
यथा योनिश्च लिङ्गं च संयोगात्स्रवतोऽमृतम्।
तथामृताग्निसंयोगाद् द्रवतस्ते न संशयः।।131।।

तच्चक्रपीडनाद्रात्रौ ज्योतिर्भात्यर्कसोमगम्।
तां दृष्ट्वा परमां ज्योत्सनां कालज्ञानं प्रवर्तते।।132।।
सहस्रारं भवेच्चक्रं ताभ्यामुपरि संस्थितम्।
ततश्चक्रात्समुद्भूतं ब्रह्माण्डं तदुदाहृतम्।।133।।
तत्रस्थां मुञ्चते धारां सोमो ह्यग्निप्रदीपितः।
सृजतीत्थं जगत्सर्वमात्मन्यात्मन्यनन्तकम्।।134।।
षोडशद्वादशाराभ्यामष्टारेष्वथ सर्वशः।
एवं क्रमेण सर्वत्र चक्रेष्वमृतमुत्तमम्।135।।
सोमः स्रवति यावच्च पञ्चानां चक्रपद्धतिः।
तत्पुनः पिबति प्रीत्या हंसो हंस इति स्फुरन्।136।।
सकृद्यस्य तु संश्रुत्या पुण्यपापैर्न लिप्यते।
पञ्चारे सविकारोऽथ भूत्वा सोमसुतामृतात्।।137।।
धावति त्रिरसाराणि गुह्यचक्राण्यसौ विभुः।
यतो जातं जगल्लीनं यत्र च स्वकलीलया।।138।।
तत्रानन्दश्च सर्वस्य ब्रह्मचारी च तत्परः।
तत्र सिद्धिश्च मुक्तिश्च समं संप्राप्यते द्वयम्।।139।।
अत ऊर्ध्वं पुनर्याति यावद् ब्रह्मात्मकं पदम्।
अग्नीषोमौ समौ तत्र सृज्येते चात्मनात्मनि।।140।।
तत्रस्थस्तापितः सोमो द्वेधा जङ्घे व्यवस्थितः।
अधस्तं पातयेदग्निरमृतं स्रवति क्षणात्।।141।।
गुल्फजान्वादिषु व्यक्तं कुटिलार्कप्रदीपिता।
सा शक्तिस्तापिता भूयः पञ्चारादिक्रमं सृजेत्।।142।।
एवं श्रोत्रेऽपि विज्ञेयं यावत्पादान्तगोचरम्।
पादाङ्गुष्ठात्समारभ्य यावद् ब्रह्माण्डदर्शनम्।।143।।
इत्यजानन्नैव योगी जानन्विश्वप्रभुर्भवेत्।
ज्वलन्निवासौ ब्रह्माद्यैर्दृश्यते परमेश्वरः।।144।।
अत्र तात्पर्यतः प्रोक्तमक्षे क्रमचतुष्टयम्।
एकैकत्र यतस्तेन द्वादशात्मकतोदिता।।145।।
न व्याख्यातं तु निर्भज्य यतोऽतिसरहस्यकम्।
मेयेऽपि देवी तिष्ठन्ती मासराश्यादिरूपिणी।।146।।

अत एषा स्थिता संविदन्तर्बाह्योभयात्मना।
स्वयं निर्भास्य तत्रान्यद्भासयन्तीव भासते।।147।।
ततश्च प्रागियं शुद्धा तथाभासनसोत्सुका।
सृष्टिं कलयते देवी तन्नाम्नागम उच्यते।।148।।
तथा भासितवस्त्वंशरञ्जनां सा बहिर्मुखी।
स्ववृत्तिचक्रेण समं ततोऽपि कलयन्त्यलम्।।149।।
स्थितिरेषैव भावस्य तामन्तर्मुखतारसात्।
संजिहीर्षुः स्थितेर्नाशं कलयन्ती निरुच्यते।।150।।
ततोऽपि संहाररसे पूर्णे विघ्नकरीं स्वयम्।
शङ्कां यमात्मिकां भागे सूते संहरतेऽपि च।।151।।
संहृत्य शङ्कां शङ्क्यार्थवर्जं वा भावमण्डले।
संहृतिं कलयत्येव स्वात्मवह्नौ विलापनात्।।152।।
विलापनात्मिकां तां च भावसंहृतिमात्मनि।
आमृशत्येव येनैषा मया ग्रस्तमिति स्फुरेत्।।153।।
संहार्योपाधिरेतस्याः स्वस्वभावो हि संविदः।
निरुपाधिनि संशुद्धे संविद्रूपेऽस्तमीयते।।154।।
विलापितेऽपि भावौघे कञ्चिद्भावं तदैव सा।
आश्यानयेद्य एवास्ते शङ्का संस्काररूपकः।।155।।
शुभाशुभतया सोऽयं सोष्यते फलसंपदम्।
पूर्वं हि भोगात्पश्चाद्वा शङ्केयं व्यवतिष्ठते।।156।।
अन्यदाश्यानितमपि तदैव द्रावयेदियम्।
प्रायश्चित्तादिकर्मभ्यो ब्रह्महत्यादिकर्मवत्।।157।।
रोधनाद् द्रावणाद्रूपमित्थं कलयते चितिः।
तदपि द्रावयेदेव तदप्याश्यानयेदथ।।158।।
इत्थं भोग्येऽपि संभुक्ते सति तत्करणान्यपि।
संहरन्ती कलयते द्वादशैवाहमात्मनि।।159।।
कर्मबुद्ध्यक्षवर्गो हि बुद्ध्यन्तो द्वादशात्मकः।
प्रकाशकत्वात्सूर्यात्मा भिन्ने वस्तुनि जृम्भते।।160।।
अहङ्कारस्तु करणमभिमानैकसाधनम्।
अविच्छिन्नपरामर्शी लीयते तेन तत्र सः।।161।।

यथाहि खड्गपाशादेःकरणस्य विभेदिनः।
अभेदिनि स्वहस्तादौ लयस्तद्वदयं विधिः।।162।।
तेनेन्द्रियौघमार्तण्डमण्डलं कलयेत्स्वयम्।
संविद्देवी स्वतन्त्रत्वात्कल्पितेऽहंकृतात्मनि।।163।।
स एव परमादित्यः पूर्णकल्पस्त्रयोदशः।
करणत्वात्प्रयात्येव कर्तरि प्रलयं स्फुटम्।।164।।
कर्ता च द्विविधः प्रोक्तः कल्पिताकल्पितात्मकः।
कल्पितो देहबुद्ध्यादिव्यवच्छेदेन चर्चितः।।165।।
कालाग्निरुद्रसंज्ञास्य शास्त्रेषु परिभाषिता।
कालो व्यवच्छित्तद्युक्तो वह्निर्भोक्ता यतः स्मृतः।।166।।
संसाराक्लृप्तिक्लृप्तिभ्यां रोधनाद् द्रावणात्प्रभुः।
अनिवृत्तपशूभावस्तत्राहंकृत्प्रलीयते।।167।।
सोऽपि कल्पितवृत्तित्वाद्विश्वाभेदैकशालिनि।
विकासिनि महाकाले लीयतेऽहमिदंमये।।168।।
एतस्यां स्वात्मसंवित्ताविदं सर्वमहं विभुः।
इति प्रविकसद्रूपा संवित्तिरवभासते।।169।।
ततोऽन्तः स्थितसर्वात्मभावभोगोपरागिणी।
परिपूर्णापि संवित्तिरकुले धाम्नि लीयते।।170।।
प्रमातृवर्गो मानौघः प्रमाश्च बहुधा स्थिताः।
मेयौघ इति यत्सर्वमत्र चिन्मात्रमेव तत्।।171।।
इयतीं रूपवैचित्रीमाश्रयन्त्याः स्वसंविदः।
स्वाच्छन्द्यमनपेक्षं यत्सा परा परमेश्वरी।।172।।
इमाः प्रागुक्तकलनास्तद्विजृम्भोच्यते यतः।
क्षेपो ज्ञानं च संख्यानं गतिर्नाद इति क्रमात्।।173।।
स्वात्मनो भेदनं क्षेपो भेदितस्याविकल्पनम्।
ज्ञानं विकल्पः संख्यानमन्यतो व्यतिभेदनाम्।।174।।
गतिः स्वरूपारोहित्वं प्रतिबिम्बवदेव यत्।
नादः स्वात्मपरामर्शशेषता तद्विलोपनात्।।175।।
इति पञ्चविधामेनां कलनां कुर्वती परा।
देवी काली तथा कालकर्षिणी चेति कथ्यते।।176।।

मातृसद्भावसंज्ञास्यास्तेनोक्ता यत्प्रमातृषु।
एतावदन्तसंवित्तौ प्रमातृत्वं स्फुटीभवेत्।।177।।
वामेश्वरीतिशब्देन प्रोक्तां श्रीनिशिसञ्चरे।
इत्थं द्वादशधा संवित्तिष्ठन्ती विश्वमातृषु।।178।।
एकैवेति न कोऽप्यस्याः क्रमस्य नियमः क्वचित्।
क्रमाभावान्न युगपत्तदभावात् क्रमोऽपि न।।179।।
क्रमाक्रमकथातीतं संवित्तत्त्वं सुनिर्मलम्।
तदस्याः संविदो देव्या यत्र क्वापि प्रवर्तनम्।।180।।
तत्र तादात्म्ययोगेन पूजा पूर्णैव वर्तते।
परामर्शस्वभावत्वादेतस्या यः स्वयं ध्वनिः।।181।।
सदोदितः स एवोक्तः परमं हृदयं महत्।
हृदये स्वविमर्शोऽसौ द्राविताशेषविश्वकः।।182।।
भावग्रहादिपर्यन्तभावी सामान्यसंज्ञकः।
स्पन्दः स कथ्यते शास्त्रे स्वात्मन्युच्छलनात्मकः।।183।।
किञ्चिच्चलनमेतावदनन्यस्फुरणं हि यत्।
ऊर्मिरेषा विबोधाब्धेर्न संविदनया विना।।184।।
निस्तरङ्गतरङ्गादिवृत्तिरेव हि सिन्धुता।
सारमेतत्समस्तस्य यच्चित्सारं जडं जगत्।।185।।
तदधीनप्रतिष्ठत्वात्तत्सारं हृदयं महत्।
तथा हि सदिदं ब्रह्ममूलं मायाण्डसंज्ञितम्।।186।।
इच्छाज्ञानक्रियारोहं विना नैव सदुच्यते।
तच्छक्तित्रितयारोहाद्भैरवीये चिदात्मनि।।187।।
विसृज्यते हि तत्तस्माद्बहिर्वाथ विसृज्यते।
एवं सद्रूपतैवैषां सतां शक्तित्रयात्मताम्।।188।।
विसर्गः परबोधेन समाक्षिप्यैव वर्तते।
तत्सदेव बहीरूपं प्राग्बोधाग्निविलापितम्।189।।
अन्तर्नदत्परामर्शशेषीभूतं ततोऽप्यलम्।
खात्मत्वमेव संप्राप्तं शक्तित्रितयगोचरात्।।190।।
वेदनात्मकतामेत्य संहारात्मनि लीयते।
इदं संहारहृदयं प्राच्यं सृष्टौ च हृन्मतम्।।191।।

एतद्रूपपरामर्शमकृत्रिममनाबिलम्।
अहमित्याहुरेषैव प्रकाशस्य प्रकाशता।।192।।
एतद्वीर्यं हि सर्वेषां मन्त्राणां हृदयात्मकम्।
विनानेन जडास्ते स्युर्जीवा इव विना हृदा।।193।।
अकृत्रिमैतद्धृदयारूढो यत्किञ्चिदाचरेत्।
प्राण्याद्वा मृशते वापि स सर्वोऽस्य जपो मतः।।194।।
यदेव स्वेच्छया सृष्टिस्वाभाव्याद् बहिरन्तरा।
निर्मीयते तदेवास्य ध्यानं स्यात्पारमार्थिकम्।।195।।
निराकारे हि चिद्धाम्नि विश्वाकृतिमये सति।
फलार्थिनां काचिदेव ध्येयत्वेनाकृतिः स्थिता।।196।।
यथा ह्यभेदात्पूर्णेऽपि भावे जलमुपाहरन्।
अन्याकृत्यपहानेन घटमर्थयते रसात्।।197।।
तथैव परमेशाननियतिप्रविजृम्भणात्।
काचिदेवाकृतिः काञ्चित् सूते फलविकल्पनाम्।।198।।
यस्तु संपूर्णहृदयो न फलं नाम वाञ्छति।
तस्य विश्वाकृतिर्देवी सा चावच्छेदवर्जनात्।।199।।
कुले योगिन उद्रिक्तभैरवीयपरासवात्।
घूर्णितस्य स्थितिर्देहे मुद्रा या काचिदेव सा।।200।।
अन्तरिन्धनसंभारमनपेक्ष्यैव नित्यशः।
जाज्वलीत्यखिलाक्षौघप्रसृतोग्रशिखः शिखी।।201।।
बोधाग्नौ तादृशे भावा विशन्तस्तस्य सन्महः।
उद्रेचयन्तो गच्छन्ति होमकर्मनिमित्तताम्।।202।।
यं कञ्चित्परमेशानशक्तिपातपवित्रितम्।
पुरोभाव्य स्वयं तिष्ठेदुक्तवद्दीक्षितस्तु सः।।203।।
जप्यादौ होमपर्यन्ते यद्यप्येकैककर्मणि।
उदेति रूढिः परमा तथापीत्थं निरूपितम्।।204।।
यथाहि तत्र तत्राश्वः समनिम्नोन्नतादिषु।
चित्रे देशे वाह्यमानो यातीच्छामात्रकल्पिताम्।।205।।
तथा संविद्विचित्राभिः शान्तघोरतरादिभिः।
भङ्गीभिरभितो द्वैतं त्याजिता भैरवायते।।206।।

यथा पुरःस्थे मुकुरे निजं वक्त्रं विभावयन्।
भूयो भूयस्तदेकात्म वक्त्रं वेत्ति निजात्मनः।।207।।
तथा विकल्पमुकुरे ध्यानपूजार्चनात्मनि।
आत्मानं भैरवं पश्यन्नचिरात्तन्मयीभवेत्।।208।।
तन्मयीभवनं नाम प्राप्तिः सानुत्तरात्मनि।
पूर्णत्वस्य परा काष्ठा सेत्यत्र न फलान्तरम्।।209।।
फलं सर्वमपूर्णत्वे तत्र तत्र प्रकल्पितम्।
अकल्पिते हि पूर्णत्वे फलमन्यत्किमुच्यताम्।।210।।
एष यागविधिः कोऽपि कस्यापि हृदि वर्तते।
यस्य प्रसीदेच्चिच्चक्रं द्रागपश्चिमजन्मनः।।211।।
अत्र यागे गतो रूढिं कैवल्यमधिगच्छति।
लोकैरालोक्यमानो हि देहबन्धविधौ स्थितः।।212।।
अत्र नाथः समाचारं पटलेऽष्टादशेऽभ्यधात्।
नात्र शुद्धिर्न चाशुद्धिर्न भक्ष्यादिविचारणम्।।213।।
न द्वैतं नापि चाद्वैतं लिङ्गपूजादिं न च।
न चापि तत्परित्यागो निष्परिग्रहतापि वा।।214।।
सपरिग्रहता वापि जटाभस्मादिसंग्रहः।
तत्त्यागो न व्रतादीनां चरणाचरणं च यत्।।215।।
क्षेत्रादिसंप्रवेशश्च समयादिप्रपालनम्।
परस्वरूपलिङ्गादि नामगोत्रादिकं च यत्।।216।।
नास्मिन्विधीयते किञ्चिन्न चापि प्रतिषिध्यते।
विहितं सर्वमेवात्र प्रतिषिद्धमथापि च।।217।।
किं त्वेदत्र देवेशि नियमेन विधीयते।
तत्त्वे चेतः स्थिरीकार्यं सुप्रसन्नेन योगिना।।218।।
तच्च यस्य यथैव स्यात्स तथैव समाचरेत्।
तत्त्वे निश्चलचित्तस्तु भुञ्जानो विषयानपि।।219।।
न संस्पृश्येत दोषैः स पद्मपत्रमिवाम्भसा।
विषापहारिमन्त्रादिसंनद्धो भक्षयन्नपि।।220।।
विषं न मुह्यते तेन तद्वद्योगी महामतिः।
अशुद्धं हि कथं नाम देहाद्यं पाञ्चभौतिकम्।।221।।

प्रकाशतातिरिक्ते किं शुद्ध्यशुद्धी हि वस्तुनः।
अशुद्धस्य च भावस्य शुद्धिः स्यात्तादृशैव किम् ।।222।।
अन्योन्याश्रयवैयर्थ्यानवस्था इत्थमत्र हि।
पृथिवी जलतः शुद्ध्येज्जलं धरणितस्तथा।223।।
अन्योन्याश्रयता सेयमशुद्धत्वेऽप्ययं क्रमः।
अशुद्धाज्जलतः शुद्ध्येद्धरेति व्यर्थता भवेत्।।224।।
वायुतो वारिणो वायोस्तेजसस्तस्य वान्यतः।
बहुरूपादिका मन्त्राः पावनात्तेषु शुद्धता।।225।।
मन्त्राः स्वभावतः शुद्धा यदि तेऽपि न किं तथा।
शिवात्मता तेषु शुद्धिर्यदि तत्रापि सा न किम्।।226।।
शिवात्मत्वापरिज्ञानं न मन्त्रेषु धरादिवत्।
ते तेन शुद्धा इति चेत्तज्ज्ञप्तिस्तर्हि शुद्धता।।227।।
योगिनं प्रति सा चास्ति भावेष्विति विशुद्धता।
ननु चोदनया शुद्ध्यशुद्ध्यादिकविनिश्चयः।।228।।
इत्थमस्तु तथाप्येषा चोदनैव शिवोदिता।
का स्यात्सतीति चेदेतदन्यत्र प्रवितानितम्।।229।।
वैदिक्या बाधितेयं चेद्विपरीतं न किं भवेत्।
सम्यक्चेन्मन्यसे बाधो विशिष्टविषयत्वतः।।230।।
अपवादेन कर्त्तव्यः सामान्यविहिते विधौ।
शुद्ध्यशुद्धी च सामान्यविहिते तत्त्वबोधिनि।।231।।
पुंसि ते बाधिते एव तथा चात्रेति वर्णितम्।
नार्थवादादिशङ्का च वाक्ये माहेश्वरे भवेत्।।232।।
अबुद्धिपूर्वं हि तथा संस्थिते सततं भवेत्।
व्योमादिरूपे निगमे शङ्का मिथ्यार्थतां प्रति।।233।।
अनवच्छिन्नविज्ञानवैश्वरूप्यसुनिर्भरः।
शास्त्रात्मना स्थितो देवो मिथ्यात्वं क्वापि नार्हति।।234।।
इच्छावान्भावरूपेण यथा तिष्ठासुरीश्वरः।
तत्स्वरूपाभिधानेन तिष्ठासुः स तथा स्थितः।।235।।
अर्थवादोऽपि यत्रान्यविध्यादिमुखमीक्षते।
तत्रास्त्वसत्यः स्वातन्त्र्ये स एव तु विधायकः।।236।।

विधिवाक्यान्तरे गच्छन्नङ्गभावमथापि वा।
न निरर्थक एवायं संनिधेर्गजडादिवत्।।237।।
स्वार्थप्रत्यायनं चास्य स्वसंवित्त्यैव भासते।
तदपह्नवनं कर्तुं शक्यं विधिनिषेधयोः।।238।।
युक्तिश्चात्रास्ति वाक्येषु स्वसंविच्चाप्यबाधिता।
या समग्रार्थमाणिक्यतत्त्वनिश्चयकारिणी।।239।।
मृतदेहेऽथ देहोत्थे या चाशुद्धिः प्रकीर्तिता।
अन्यत्र नेति बुद्ध्यन्तामशुद्धं संविदश्च्युतम्।।240।।
संवित्तादात्म्यमापन्नं सर्वं शुद्धमतः स्थितम्।
श्रीमद्वीरावलौ चोक्तं शुद्ध्यशुद्धिनिरूपणे।।241।।
सर्वेषां वाहको जीवो नास्ति किञ्चिदजीवकम्।
यत्किंचिज्जीवरहितमशुद्धं तद्विजानत।।242।।
तस्माद्यतसंविदो नातिदूरे तच्छुद्धिमावहेत्।
अविकल्पेन भावेन मुनयोऽपि तथाभवन्।।243।।
लोकसंरक्षणार्थं तु तत्तत्त्वं तैः प्रगोपितम्।
बहिः सत्स्वपि भावेषु शुद्ध्यशुद्धी न नीलवत्।।244।।
प्रमातृधर्म एवायं चिदैक्यानैक्यवेदनात्।
यदि वा वस्तुधर्मोऽपि मात्रपेक्षानिबन्धनः।।245।।
सौत्रामण्यां सुरा होतुः शुद्धान्यस्य विपर्ययः।
अनेन चोदनानां च स्ववाक्यैरपि बाधनम्।।246।।
क्वचित्संदर्शितं ब्रह्महत्याविधिनिषेधवत्।
भक्ष्यादिविधयोऽप्येनं न्यायमाश्रित्य चर्चिताः।।247।।
सर्वज्ञानोत्तरादौ च भाषते स्म महेश्वरः।
नरर्षिदेवद्रुहिणविष्णुरुद्राद्युदीरितम्।।248।।
उत्तरोत्तरवैशिष्ट्यात् पूर्वपूर्वप्रबाधकम्।
न शैवं वैष्णवैर्वाक्यैर्बाधनीयं कदाचन।।249।।
वैष्णवं ब्रह्मसंभूतैर्नेत्यादि परिचर्चयेत्।
बाधते यो वैपरीत्यात्स मूढः पापभाग्भवेत्।।250।।
तस्मान्मुख्यतया स्कन्द लोकधर्मान्न चाचरेत्।
नान्यशास्त्रसमुद्दिष्टं स्रोतस्युक्तं निजे चरेत्।।251।।

यतो यद्यपि देवेन वेदाद्यपि निरूपितम्।
तथापि किल सङ्कोचभावाभावविकल्पतः।।252।।
सङ्कोचतारतम्येन पाशवं ज्ञानमीरितम्।
विकासतारतम्येन पतिज्ञानं तु बाधकम्।।253।।
इदं द्वैतमिदं नेति परस्परनिषेधतः।
मायीयभेदक्लृप्तं तत्स्यादकाल्पनिके कथम्।।254।।
उक्तं भर्गशिखायां च मृत्युकालकलादिकम्।
द्वैताद्वैतविकल्पोत्थं ग्रसते कृतधीरिति।।255।।
सिद्धान्ते लिङ्गपूजोक्ता विश्वाध्वमयताविदे।
कुलादिषु निषिद्धासौ देहे विश्वात्मताविदे।।256।।
इह सर्वात्मके कस्मात्तद्विधिप्रतिषेधने।
नियमानुप्रवेशेन तादात्म्यप्रतिपत्तये।।257।।
जटादि कौले त्यागोऽस्य सुखोपायोपदेशतः।
व्रतचर्या च मन्त्रार्थतादात्म्यप्रतिपत्तये।।258।।
तन्निषेधस्तु मन्त्रार्थसार्वात्म्यप्रतिपत्तये।
क्षेत्रपीठेपपीठेषु प्रवेशो विघ्नशान्तये।।259।।
मन्त्राद्याराधकस्याथ तल्लाभायोपदिश्यते।
क्षेत्रादिगमनाभावविधिस्तु स्वात्मनस्तथा।।260।।
वैश्वरूप्येण पूर्णत्वं ज्ञातुमित्यपि वर्णितम्।
समयाचारसद्भावः पाल्यत्वेनोपदिश्यते।।261।।
भेदप्राणतया तत्तत्त्यागात्तत्त्वविशुद्धये।
समयादिनिषेधस्तु मतशास्त्रेषु कथ्यते।।262।।
निर्मर्यादं स्वसंबोधं संपूर्णं बुद्ध्यतामिति।
परकीयमिदं रूपं ध्येयमेतत्तु मे निजम्।।263।।
ज्वालादिलिङ्गं चान्यस्य कपालादि तु मे निजम्।
आदिशब्दात्तपश्चर्यावेलातिथ्यादि कथ्यते।।264।।
नाम शक्तिशिवाद्यन्तमेतस्य मम नान्यथा।
गोत्रं च गुरुसंतानो मठिकाकुलशब्दितः।।265।।
श्रीसंततिस्त्र्यम्बकाख्या तदर्धामर्दसंज्ञिता।
इत्थमर्धचतस्रोऽत्र मठिकाः शाङ्करे क्रमे।।266।।

युगक्रमेण कूर्माद्या मीनान्ता सिद्धसंततिः।
आदिशब्देन च घरं पल्ली पीठोपपीठकम्।।267।।
मुद्रा छुम्मेति तेषां च विधानं स्वपरस्थितम्।
तादात्म्यप्रतिपत्त्यै हि स्वं सन्तानं समाश्रयेत्।।268।।
भुञ्जीत पूजयेच्चक्रं परसंतानिना नहि।
एतच्च मतशास्त्रेषु निषिद्धं खण्डना यतः।।269।।
अखण्डेऽपि परे तत्त्वे भेदेनानेन जायते।
एवं क्षेत्रप्रवेशादि संताननियमान्ततः।।270।।
नास्मिन्विधीयते तद्धि साक्षान्नौपयिकं शिवे।
न तस्य च निषेधो यत्र तत्तत्त्वस्य खण्डनम्।।271।।
विश्वात्मनो हि नाथस्य स्वस्मिन्रूपे विकल्पितौ।
विधिर्निषेधो वा शक्तौ न स्वरूपस्य खण्डने।।272।।
परतत्त्वप्रवेशे तु यमेव निकटं यदा।
उपायं वेत्ति स ग्राह्यस्तदा त्याज्योऽथ वा क्वचित्।।273।।
न यन्त्रणात्र कार्येति प्रोक्तं श्रीत्रिकशासने।
समता सर्वदेवानामोवल्लीमन्त्रवर्णयोः।।274।।
आगमानां गतीनां च सर्वं शिवमयं यतः।
स ह्यखण्डितसद्भावं शिवतत्त्वं प्रपश्यति।।275।।
यो ह्यखण्डितसद्भावमात्मतत्त्वं प्रपद्यते।
केतकीकुसुमसौरभे भृशं भृङ्ग एव रसिको न मक्षिका
भैरवीयपरमाद्वयार्चने कोऽपि रज्यति महेशचोदितः।।276।।
अस्मिंश्च यागे विश्रान्तिं कुर्वतां भवडम्बरः।
हिमानीव महाग्रीष्मे स्वयमेव विलीयते।।277।।
अलं वातिप्रसङ्गेन भूयसातिप्रपञ्चिते।
योग्योऽभिनवगुप्तोऽस्मिन्कोऽपि यागविधौ बुधः।।278।।
इत्यनुत्तरपदप्रविकासे शाक्तमौपयिकमद्य विविक्तम्।

■

(आ) चतुर्थ आह्निक की कारिकानुसार विषयसूची

विषय	कारिका संख्या
शाक्तोपाय का निर्देश	1
विकल्प-संस्कार का उपदेश	2
क्षणिक ज्ञानरूप विकल्प के संस्कार का प्रश्न	3
संस्कार की कोटियाँ	4-5
स्फुटतम विकल्प के द्वारा संवित् की निर्विकल्पता	6
स्फुटतम विकल्प से भैरवीय तेज की स्फुटता	7
संवित् को विकल्प-संस्कार से परामृश्य मानने पर उसकी जडता की आशंका	8
तत्त्वतः संवित् पूर्ण एवं अहेयोपादेय	9
विकल्प-संस्कार माया के कारण	10
माया का स्वरूप	11
द्वैत का स्वरूप	12
द्वैत के निराकरण का आधार तर्क	13
तर्क अथवा भावना द्वारा सिद्धि	14
तर्क की उत्तम योगाङ्गता	15
तर्क द्वारा अनामय पद की प्राप्ति	16
अन्य शास्त्रों (सांख्यादि) में बताये गये मोक्षोपायों की हेयता (द्विविध तर्क)	17
मोक्ष में रागपूर्वक प्रवृत्ति से बचने के लिए तर्क की उपादेयता	18-19
राग 'अंशक', स्वभाव एवं सिध्यङ्ग है पर मोक्ष के लिये विघ्नभूत	19-20
वामा शक्ति (मायापाश) के प्रभाव से राग द्वारा वैष्णव, पाञ्चरात्र, वेदान्त, सौगतादि दर्शनों में प्रवृत्ति	20-22
भैरवसमावेश के निन्दकों का अधःपतन	23
भेदवादी शास्त्रों के प्रति आस्था रखने वालों की मुक्ति असम्भव	24
'श्रीकामिकागम' के पाशप्रकरण का इस सम्बन्ध में प्रमाण	25-27
रागतत्त्व की नियामकता	28
वैष्णव आदि ब्रह्मवादी, विज्ञानवादी, वैभाषिक-नैयायिक का मोक्ष प्रलयाकल के समान	29-30
वैष्णव आदि दर्शनों की मुक्ति की हेयता	31-32

माया के कारण दर्शनान्तरों में राग 33
शुद्धविद्यारूप सत्तर्क द्वारा सद्गुरु की प्राप्ति 34
'श्रीपूर्वशास्त्र' का इस सम्बन्ध में प्रमाण 35
शिव के शक्तिपात की क्रमिकता 36
अच्छे तथा बुरे गुरु अथवा शास्त्र की प्राप्ति का कारण
शक्तिपात का भेद (वामाशक्ति तथा ज्येष्ठा शक्ति) 37
उक्त कथन की 'स्वच्छन्दशास्त्र' द्वारा पुष्टि 38
शुद्धविद्या (शक्तिपात) की महिमा से वैष्णवादि जनों की सन्मार्ग में प्रवृत्ति 39-40
सत्तर्क के परामर्श का कारण (सांसिद्धिक तर्क) 40-41
गुरु, शास्त्र और स्वपरामर्श में उत्तरोत्तर की मुख्यता 41-42
स्वतः सत्तर्कशील की अधिकारिता 42-43
सत्तर्क की सर्वोत्कृष्टता 43-44
समस्त शास्त्रार्थ सत्तर्क से ही 44
शुद्धविद्या सत्य की अवभासक 45 (अ)
सभी शास्त्रों के ज्ञान की 'अकस्मात्' उत्पत्ति 45 (ब)
'श्रीपूर्वशास्त्र' द्वारा पुष्टि 46 (अ)
'अकस्मात्' का अभिप्राय 46-47
'सांसिद्धिक' के पाँच भेद 47-48
सांसिद्धिक को यागादि के बिना भी सिद्धि 49
उसकी निर्वाणगामिनी दीक्षा 50
सांसिद्धिक ही 'अकल्पितगुरु' 51-52
अकल्पितकल्पकगुरु और उसके भेद 51-52
अकल्पितकल्पक ज्ञानी की भावनादि से शास्त्र-ज्ञान में अधिकारिता 53
भावनादि विभिन्न उपायों की शास्त्रों द्वारा पुष्टि 54
'श्रीसर्ववीर ग्रन्थ' का इस सम्बन्ध में प्रमाण 55-57
'श्रीब्रह्मामल' ग्रन्थ का प्रमाण 57-58
अकल्पितकल्पक गुरु का मुख्य लक्षण 59
'ब्रह्मयामल' ग्रन्थ द्वारा पुष्टि 60 (अ)
जपादि से सिद्धि न मिलने पर आत्मदीक्षा द्वारा प्राप्ति (श्री ब्रह्मयामल का प्रमाण) 60-62
स्फुरत्ता में आत्मविज्ञान की मुख्यता का 'श्रीब्रह्मयामल' में प्रतिपादन 62-63
'आचार्य' 'साधक'; 'पुत्रक' और 'समयी' का वहीं प्रतिपादन 63-64

गुरु के न मिलने पर साधक द्वारा रक्तादेवी के अनुष्ठान का 'श्रीब्रह्मयामल' में विधान 65
पुस्तक से स्वयं मन्त्रज्ञान करने पर 'श्रीसिद्धामत' में प्रतिपादित सदोषता तथा उसका
(श्रीब्रह्मयामल के अनुसार) निराकरण 66
पुस्तक से मन्त्रज्ञान की सदोषता के सम्बन्ध में 'श्रीसिद्धामत' का प्रमाण 67-68
पुस्तकाधीत विद्या और दीक्षाशून्यता में अन्योन्याश्रयदोष 69 (अ)
'अकल्पितकल्पक' के अनन्तर 'कल्पिताकल्पक' का प्रतिपादन 69-70
गुरु की आराधना तथा दीक्षा से कल्पितकल्पक द्वारा पाश का निवारण 70-72
'कल्पिताकल्पित' का स्वरूप 72-73
शुद्धविद्या के कारण अकल्पित भाग की श्रेष्ठता 73-74
'कल्पित' की अपेक्षा 'अकल्पित' की श्रेष्ठता का कारण 74-76
'अकल्पित' में भी शास्त्र एवं गुरु के संस्कार होते हैं 76-77
आत्मप्रत्ययितज्ञान की भैरवरूपता 77-78
त्रिविध ज्ञान के सम्बन्ध में 'श्रीकिरणागम' का प्रमाण
तथा श्रीनिशाटन के अनुसार उसकी समस्त-व्यस्तरूपता 78-79
उपायों की अनेकता होते हुए भी छेदन की भाँति फल की एकता 80-81
समस्त अथवा व्यस्त उपायों से प्रमाता का निराकांक्ष आश्वासन ही फल है
जो शक्तिपात के भेद के कारण प्रमाणों के लिए भी अवकाश छोड़ देता है 81-83
एक प्रमाण से ज्ञात अर्थ में प्रमाणान्तर की उपयोगिता
(बौद्धों के धारावाहिक ज्ञान-सम्बन्धीमत का खण्डन) 84
प्रमाणान्तरों द्वारा ज्ञात अर्थ के सम्बन्ध में अपूर्वता के आधार पर व्यर्थता,
अनवस्था, अन्योन्यात्तयता दोषों का खण्डन 85
(तर्कतत्त्व के निरूपण में प्रसङ्गतः गुरुतत्त्व के विवेचन के
अनन्तर पुनः तर्कतत्त्व का प्रतिपादन) तर्क से ज्ञान में कुशलता 86
तर्कज्ञान में अहिंसादि पाँच यमों तथा तपस्यादि नियमों की अनुपयोगिता 87-88
प्राणायाम की निरर्थकता के सम्बन्ध में 'श्रीवीरावली' का प्रमाण
तथा उसके अनुसार मोक्ष का स्वरूप 89-90
शरीर को कष्ट देने वाले प्राणायाम का निषेध 91
प्रत्याहार, धारणा, ध्यान तथा समाधि का स्वरूप 92-94
धारणादि की अनुपयोगिता, यमादि तर्क के उपाय 95-96
संविद् का संस्कार सम्भव नहीं 97
प्राण-बुद्धि-देहादि के संस्कार से अन्यत्र भेदनिवृत्ति 98
इसके समर्थन में दृष्टान्तः ऊपर उछलने के अभ्यास से नीचे गिरने का

भय स्वतः निवृत्त हो जाता है 99
उसी प्रकार गुरुवचन के अनुसार आगमार्थ के
आत्मचिन्तन से विपरीत अर्थ की स्वतः निवृत्ति 100
गुरु शिष्य में अपने ज्ञान अथवा शब्द को आरोपित नहीं कर सकता
अतः आत्मचिन्तन (स्वविमर्श) आवश्यक 101
स्वयं की भावना से स्वाप्निक वस्तु भी साक्षात् हो जाती है 102
शब्दनिष्ठ विमर्श पाठ है और अर्थनिष्ठ चिन्तन 103
अस्तु, संस्कार अद्वय संवित्ति के लिये अनुपयोगी होने पर भी द्वैत की निवृत्ति का साधन है 104
स्वपरामर्शात्मक तर्क की साधना के लिए यमादि की उपायता 105
उपर्युक्त मान्यता के समर्थन में 'श्रीपूर्वशास्त्र' का प्रमाण प्राणायामादि रूप
योग की कृत्रिमता, अद्वययोग की सहजता 106-08
अत एव (श्रीपूर्वशास्त्र में) चित्तस्थैर्य के लिये नियत का खण्डन तथा
'जिसका जैसे मन लगे' का समर्थन 108-09
परमेश्वर की कहीं-कहीं अमल स्वभाव में स्थिति 109-10
स्वभावपरामर्श इन्द्रियों से अथवा उनके बिना सम्भव,
विकल्प क्षेत्रज्ञ के स्वातन्त्र्य का उल्लास है 110-11
विकल्प के दो प्रकारः मायीय एवं शुद्धविद्यात्मक 111-113
शुद्धविद्यारूप विकल्प से मायीय विकल्प की समाप्ति 113-14
स्नान-शुद्धि-अर्चना-होम-ध्यान-जपादि के भेद से शुद्धविद्यारूप ज्ञान के अनेक प्रकार 114-15
शुद्ध योगी द्वारा अध्वमण्डल का तर्पण
(योगाङ्ग की भाँति स्नानदि की अनुपयोगिता का संकेत) 115-16
स्नान का स्वरूप 116-17
उससे लाभ 117-18
शुद्धि तथा अशुद्धि का स्वरूप 118-19
देह में चिन्मयता एवं भेदशून्यता का साक्षात्कार 119-20
भाव का चिदात्मा के साथ एकाकार ही पूजा 120-22
स्वपरामर्शात्मक स्वरूप से अच्युत रहकर संवित् के आन्तर और
बाह्य रूपों में वर्तमान होने से पूजा सम्भव 122-23
परामर्श के बारह प्रकार 123-24
प्रमातृ-प्रमाण-प्रमेय में संविद् की सृष्टि, स्थिति, संहार अनाख्यरूप
चतुर्धा स्थिति (परामर्श के बारह प्रकार) 125
परासंविद् प्रमाता में शुद्धज्ञानरूपा, ज्ञान में विकल्परूपा तथा प्रमाण में ग्रहणरूपा होती है,

श्रीयोगसंचर का प्रमाण 126
(श्रीयोगसंचर के अनुसार) श्वेतचक्षुमण्डल में षोडशादि तथा द्वादशार चक्र की स्थिति 127
दोनों की एक साथ स्थिति का स्पष्टीकरण 128
अग्निसोमात्मक प्रमातृप्रमेयरूप दोनों चक्रों द्वारा सृष्टि एवं संहार 129-30
अमृताग्निरूप प्रमेय तथा प्रमाता के संयोग से योनिलिङ्गरूप
माया-परमेश्वर के समस्त षोडशार-अष्टार से अमृतरूपा संवित् का स्फुरण 131
षोडशार एवं अष्टार चक्रों के पीडन से प्रमातृरूप ज्योति का
आभासन एवं उससे काल-ज्ञान का प्रवर्तन 132
सहस्रार चक्र की ऊर्ध्व स्थिति एवं उससे ब्रह्माण्डादि का उद्भव 133
अनन्त सोम (क्रिया शक्ति) द्वारा विश्व की प्रस्फुरणा 134
षोडशार, द्वादशार, अष्टारादि चक्रों में सोम द्वारा अमृत-स्रवण (बाह्यरूपता का आपादन) 135-36
अहं प्रमाता में विश्व का संहार 136-37
सिसृक्षा के कारण रसों एवं गुह्य चक्रों के रूप में शिव की उन्मुखता 137-38
सिद्धि एवं मुक्ति की एक साथ प्राप्ति 139
ब्रह्मात्मक ऊर्ध्व पद में अग्नि एवं सोम की समानतया सृष्टि 140
सोम के द्वारा विश्व की सृष्टि 141 (अ)
पञ्चभूतात्मक सृष्टि का प्रकार 141-42
ज्ञानेन्द्रिय एवं कर्मेन्द्रिय में प्रकारसाम्य 143
इन्द्रियादि की चिन्मयता के ज्ञान से विश्वप्रभुता 144
प्रत्येक इन्द्रिय की द्वादशमरीचिरूपता का रहस्य 145
इस रहस्य की गोपनीयता संवित् की मास-राशि आदि के रूप में स्थिति 146
अस्तु, संवित् की आन्तर एवं बाह्यरूपता (द्वादश देवियों का स्वरूप-विवेचन) 147
सृष्टिकलना के कारण 'श्रीसृष्टिकाली' 148
रूपादि के रंजन से 'श्रीरक्तकाली' 149
स्थिति का विनाश करने से 'स्थितिनाशकाली' 150
नियमन करने के कारण अनाख्य अथवा 'नियमकाली' 151
संहार-कलनात्मिका 'संहारकाली' 152
संहार का अभिप्राय 153
मृत्युरूपा संविद् की कलना के कारण 'मृत्युकाली' 154
भावविशेष की घनता से उत्पन्न संस्कार शुभाशुभ फल का भावी कारण 155-56
भोग के पूर्व या अनन्तर शुभ एवं अशुभ फलों की आशंका 156 (ब)
प्रायश्चित्त आदि से ब्रह्महत्यादि (अशुभ) कर्मों का विनाश 157

(कर्मों के) रोधन एवं द्रावण के कारण 'रुद्रकाली' अथवा भद्रकाली 158
करणों का संहार कर अहंकार में विलीन करना (अनाख्य का स्वरूप) 159
द्वादश करणः उनका स्वरूप एवं संख्यान 160
करणवर्ग की सर्वार्थपरामर्शक अहंकार में विश्रान्ति 161
इसका दृष्टान्त 162
बुद्धीन्द्रियरूप मार्तण्डमण्डल को अहंकार में कल्पित करने वाली 'मार्तण्डकाली' 163
परमादित्य रूप अहंकार का कर्ता (प्रमाता) में विलय 164
दो प्रकार का कर्ता : कल्पित तथा अकल्पित, कल्पित का स्वरूप 165
उसकी 'काल' 'अग्नि' तथा 'रुद्र' संज्ञाएँ 166
अहंकाररूप परमार्क का इस प्रमाता में कलना के कारण 'परमार्थकाली' 167
कालाग्निरुद्र संज्ञक प्रमाता की कलना करने वाली 'कालाग्नि रुद्रकाली' 168
परमप्रमातृरूप महाकाल की कलना करने वाली
'महाकालकाली' (प्रमातृगत संहार का स्वरूप) 169-70
महाभैरवात्मक प्रमाता, चण्डरूप प्रमेय, उग्ररूप प्रमा तथा घोररूप प्रमाण की
कलना करने वाली 'महाभैरवचण्डोग्रघोरकाली' अथवा परापरमेश्वरी'
(प्रमातृगत अनाख्या का स्वरूप) 171-72
परमेश्वरी कहने का कारण 173 (अ)
कलना के पाँच अर्थ 173-75
पञ्चविध कलना के कारण परादेवी की 'काली' तथा 'कालकर्षिणी' संज्ञाएँ 176
श्रीनिशाटन के अनुसार इसी की 'मातृसद्भाव' तथा 'वामेश्वरी' संज्ञाएँ 177-78
परा संवित् ही द्वादशात्मिका देवी के रूप में प्रतिष्ठित है जो क्रम एवं अक्रम से परे है 178-80
संवित् से एकात्मता पूर्ण पूजा है 180-81
परावाक् -अहंपरामर्शात्मक सहज उदित नाद- संवित् का परम 'हृदय'
(तात्त्विक रूप) है 181-82
इसी की 'स्पन्द' संज्ञा है 182-83
आगमान्तर में इसी स्पन्द की संज्ञा 'ऊर्मि' है 184
'ऊर्मि' संज्ञा का कारणः परमतत्त्व सिन्धु तथा परम हृदय 185-86
ब्रह्ममूलक मायीय संसार की इच्छाज्ञानक्रिया के कारण सद्रूपता 186-88
इस सद्रूपता का आधार परा संवित् 188-89
शून्यता को क्रमशः प्राप्त सद्रूप संसार ज्ञानरूप होकर
संहारात्मा में विलीन हो जाता है 189-91
'हृत्' संज्ञा का अभिप्राय 191 (ब)

शुद्ध अहंपरामर्श की प्रकाशरूपता तथा मन्त्रवीर्यरूपता 192-93
जप का पारमार्थिक स्वरूप 194
ध्यान का पारमार्थिक स्वरूप 195
फलार्थी की दृष्टि से तत्त्वतः निराकार की आकारशीलता 196
नियत आकार के ग्रहण करने का दृष्टान्त 197-98
निष्काम योगी के लिये संवित् विश्वाकार होती है, नियताकार नहीं 199
मुद्रा का तात्त्विक स्वरूप 200
होम का वास्तविक स्वरूप 201-02
दीक्षित का स्वरूप 203
जपादि में से प्रत्येक से परम सिद्धि, प्रयोजन-निर्देश 204
जपादि की विभिन्न भंगिमाओं से अनुत्तरता की प्राप्तिः अश्व का दृष्टान्त 205-06
दर्पण में बहुधा मुखदर्शन की भाँति जपादि से आत्मदर्शन 207-08
तन्मयीभाव का स्वरूप 209
तन्मयीभाव के अनन्तर कुछ भी प्राप्य नहीं 210
अपूर्व याग-विधि से चैतन्य का सहज आविर्भाव 211
जीवन्मुक्त का स्वरूप 212
(श्रीमालिनीविजय 14.74-81 का) प्रमाण 213
शुद्ध्यशुद्धि, भक्ष्याभक्ष्य, द्वैताद्वैत, लिङ्गपूजादि का स्वीकार-अस्वीकार, परिग्रह-अपरिग्रह, जटाभस्मादि-ग्रहणाग्रहण, व्रताचरण-अचरण, क्षेत्रादिप्रवेश, समयादिपालन, परमस्वरूपलिङ्गादि, नामगोत्रादि के विधिनिषेध से परे रहना 213-17
किन्तु चित्त को तत्त्व में लगाये रखना 218
तत्त्व में स्थिर योगी दोषों से स्पृष्ट नहीं होताः जल-कमल तथा मन्त्र-विष का दृष्टान्त 219-21
शुद्ध्यशुद्धि प्रकाश से अलग नहीं तो पञ्चभौतिक देह अशुद्ध कैसे होगी ? 221-22
वस्तु का वस्त्वन्तर से शोधन मानने पर त्रिविध दोष 222
पृथ्वी की जल से और जल की पृथ्वी से शुद्धि मानने में अन्योन्याश्रयदोष 223
अशुद्ध जल से अशुद्ध पृथ्वी की शुद्धि मानने में व्यर्थता दोष 224
जल की वायु से, वायु की तेज से, उसकी किसी अन्य से शुद्धि मानने में अनवस्थादोष 225
मन्त्रों की भाँति पृथिव्यादि को ही स्वभाव-शुद्ध क्यों नहीं मान लेते क्योंकि शिवात्मतारूप शुद्धि उनमें भी है 225-26
मन्त्रों में शिवात्मता का अज्ञान सम्भव नहीं जो कि पृथिव्यादि में सम्भव है 227
योगी की दृष्टि से पृथिव्यादि (भावों) में भी विशुद्धता है, तो क्या शुद्ध्यादि का निश्चय विधि-निषेध (चोदना) से किया जाये? 228

शैव से क्यों, वैदिक प्रमाण से शुद्ध्यादि का निश्चय क्यों न माना जाये 229
आगम से वेद का ही बाध क्यों न माना जाये ? 230-31
विशिष्टविषयता के कारण आगम की अपवादविधि मानना उचित है 230-31
सामान्यविधि से विहित शुद्ध्यशुद्धि का तत्वज्ञ के सन्दर्भ में
आगममोक्त अपवादविधि से बाध, आगम-प्रमाण अर्थवादात्मक नहीं 231-32
निगम में मिथ्यार्थता की शङ्का की जा सकती है 233
शिव के शरीरभूत आगम में यह शङ्का सम्भव नहीं 234
परमेश्वर आगम-प्रणेता नहीं अपितु आगमरूप में अवस्थित है 235
अर्थवाद ईश्वर के स्वातन्त्र्य का विधायक है 236
विधिवाक्य का अङ्ग होने पर भी पदवर्णों की भाँति अर्थवाद की सत्यार्थता 237
बलात् अर्थापह्नव अर्थवाद का ही नहीं अपितु विधिनिषेध वाक्य का भी सम्भव है 238
अर्थतत्त्व के निश्चय में युक्ति तथा स्वानुभव की साधकता 239
आगम के अनुसार शुद्ध्यशुद्धि का मूल आधार संवित् से तादात्म्य तथा च्युतिः
'वीरावली' की उक्ति का निर्देश 240-41
जीव रहित कुछ भी नहीं, अजीवक ही अशुद्ध है 242
संवित् से सन्निकृष्ट शुद्ध है, इसी आधार पर ऋषियों के वामाचार की शुद्धता 243
इस रहस्य का गोपन 244 (अ)
शुद्धता एवं अशुद्धता बाह्य नहीं अपितु प्रमातृधर्म है 244-45
अथवा प्रमात्रपेक्ष वस्तुधर्म है, इसी कारण सौत्रामणि में सुरा शुद्ध है अन्यत्र अशुद्ध 245-46
वेद-विधि के बाधित होने का दूसरा उदाहरणः ब्रह्महत्या निषेध का अपवाद 246-47
वैदिक प्रमाण से शैवागमों की श्रेष्ठता, विभिन्न प्रमाणों की उत्तरोत्तर श्रेष्ठताः
सर्वज्ञानोत्तर का प्रमाण 248-50
लोकधर्मों का नहीं अपितु अपने शास्त्र के अनुसार आचरण का उपदेश 251
अभेदप्रधान शैवागमों की भेदप्रधान वेदादि से श्रेष्ठता 252
'पतिशास्त्र' (शैवागम) पाशवशास्त्र (वेदज्ञान) के बाधक हैं 253
द्वैत तथा अद्वैत की कल्पना मायीय है, ईश्वर इन दोनों से अस्पृष्ट है 254
भर्गशिखा का इस सम्बन्ध में प्रमाण 255
'सिद्धान्त' मत (भेददर्शन) द्वारा लिङ्गपूजादि (द्रष्टव्य - 4. 213-17) की विधि,
'कुलादि' अद्वयदर्शन द्वारा निषेध, परमाद्वयरूप त्रिकदर्शन द्वारा विधिनिषेध की
निरर्थकता का प्रतिपादन (लिङ्गपूजादि 256-57, जटाभस्मादि 257-58, व्रतादि,
निष्परिग्रहतादि 258-59, क्षेत्र-पीठ-अपीठ-प्रवेश 259-61, समयाचार 261-63,

परस्वरूपलिङ्ग 263-64, तपश्चर्या- वेला-तिथि-नाम-गोत्रादि 264-66) 256-66
प्रसङ्गतः गोत्र (मठिका अथवा कुल) का अर्थ 265
मठिकाओं की संख्या 266
कूर्म से मीन तक की सिद्ध परम्परा 267
'गोत्रादि' के आदि शब्द से गृहीत घर, पल्ली, पीठ, उपपीठ की परम्पराओं में भेद का निर्देश,
अपनी परम्परा का आश्रय ले 267-68
इनके विधि-निषेध के खण्डन-मण्डन से परे रहने का प्रतिपादन 270-71
शिव द्वारा स्वस्वरूप में विकल्पित विधिनिषेध उसके स्वरूप को खण्डित नहीं कर सकते 272
ग्राह्य एवं त्याज्य उपाय के सम्बन्ध में 'श्रीत्रिकशासन' द्वारा निर्देशः
परतत्त्व में प्रवेशार्थ यन्त्रणाहीन साधन ही उपाय हैं 273-74
'श्रीत्रिकशासन' का उद्धरण 274-75
आत्मतत्त्वज्ञ ही शिवतत्त्व का दृष्टा है 275-76
शक्तिपात से पवित्र मुमुक्षु की ही परतत्त्व में केतकीगन्ध में भ्रमर की भाँति आसक्ति 276
तत्त्वविश्रान्ति से संसार का प्रपञ्च गल जाता है जैसे कि भयंकर गर्मी में बर्फ 277
पराद्वयदर्शन (यागविधि) में 'अभिनवगुप्त' की योग्यता
(अभिनवगुप्त पद का दार्शनिक अर्थ) 278

(इ) चतुर्थ आह्निक का सटिप्पण अनुवाद

अब शाम्भवोपाय के बाद शाक्तोपाय का वर्णन किया जाता है:-

1. इसके बाद (हम) परम आत्म संवित् के लिए शाक्त उपाय मण्डल को कहते हैं।[1]

विकल्प-संस्कार आदि अनेक हैं। इसलिए यहाँ 'उपायमण्डल' शब्द का प्रयोग किया गया है।

विकल्प-संस्क्रिया का अभिधानः-

2. **बाद के आह्निक में प्रतिपादित परमेश्वर के (निर्विकल्प) स्वरूप में आविष्ट होने का इच्छुक विकल्प का शीघ्र संस्कार करे।**

सुने हुए ज्ञान के विषय में अस्फुट अवस्था से स्फुटतम अवस्था[2] तक बार-बार चिन्तन आदि करने से गुणों के हृदय में अवस्थापन को संस्कार कहते हैं। इसी के कारण मुमुक्षु निर्विकल्प स्वरूप में प्रविष्ट होता है। 'ज्ञान क्षणिक है' इससे सभी सहमत हैं। विकल्प भी एक प्रकार का ज्ञान होने के कारण क्षणिक है। अतः क्षणिक ज्ञान का संस्कार नहीं हो सकता, संस्कार तो स्थिर का ही हो सकता है:-

3. **संस्कारित विकल्प अपने ही समान संस्कारित विकल्प को जन्म देता है (और) वह (द्वितीय संस्कृत विकल्प) अपने समान (अन्य तृतीय) को और वह अपने ही समान अन्य (चतुर्थ) को (जन्म देता है)।**

कारण के अनुरूप ही कार्य की उत्पत्ति होती है। इसी नियमानुसार एक विकल्प अपने ही समान दूसरे विकल्प को जन्म देता है तथा एक विकल्प से दूसरे विकल्प के अत्यन्त दूर होने पर भी उनमें सादृश्य की हानि नहीं होती है।

एक संस्कृत विकल्प से उसी के समान दूसरे विकल्प की उत्पत्ति होना तो ठीक है, किन्तु तृतीय आदि विकल्पों की भी उसी प्रकार उत्पत्ति होना निरर्थक होगा और यदि द्वितीय से तृतीय आदि विकल्पों में कुछ विशेष माना जाता है तो उनमें परस्पर सादृश्य की हानि होगी। इस शङ्का का समाधान किया जाता है :-

4. **चारों ही विकल्पों में जो यह संस्कार (है वही) (अभ्यास के अतिशय के अनुसार) क्रमशः अस्फुट, स्फुटन की योग्यता वाला, स्फुटता की ओर बढ़ने वाला (तथा अन्त में) स्फुटरूप हो जाता है।**

चूँकि प्रथम स्तर से आगे के अन्य स्तरों में स्पष्टता की दृष्टि से क्रमशः अतिशय आया है। अतः अब न तो निरर्थकता का प्रसङ्ग है और न ही सादृश्य की हानि का। क्योंकि किसी दूसरे विसदृश प्रत्यय की उत्पत्ति नहीं हुई है।

विकल्प का संस्कार क्रमशः आगे भी बढ़ता है:-

5. (अ) **उस (चतुर्थ) के बाद (वह मूल संस्कार) और अन्त में स्फुटतम होता है।**

अभ्यास का अतिशय होने पर भी अस्फुटत्वादिरूप विकल्प, स्फुटताभावी आदि रूपों को शीघ्र कैसे प्राप्त करता है:-

(ब) **और स्फुट आदि विकल्प में मध्यवर्ती भेद (विशेष) भी है।**

6. **(उन संस्कारों) के बाद स्फुटतम, उदार (महत्) एवं विकल्प के संस्कार से निरपेक्ष (2) वह (विकल्परूपा) संविद् विमल (अर्थात् संकोच के कलंकों से रहित) निर्विकल्पता को प्राप्त हो जाती है।**

संविद्[3] स्फुटतम विकल्प के बाद निर्विकल्प हो जाती है। अतः जिज्ञासु को विकल्पमात्र में ही नहीं रुकना चाहिये।[4]

7. **(संस्कारों के कारण विकल्प-संविद् ही अविकल्प संविद्रूपता को प्राप्त हो जाती है) इसलिए संवित्स्वभाव वाला (ज्ञान क्रिया नामक) जो भैरवीय तेज है वह बार-बार के परामर्श से (अर्थात् अस्फुटत्वादि के क्रम से) स्फुटरूपता को प्राप्त हो जाता है।**

प्रमाता से एक रूप होने के कारण 'संविद्' ज्ञान रूप तो हो सकती है, किन्तु ज्ञेय रूप नहीं हो सकती हैऔर यदि उसे ज्ञेय माना जाता है तो नीलादि की तरह उसमें जड़ता आ जायेगी इसी शंका को प्रस्तुत किया जाता है :-

8. **यदि संविद् ज्ञात्री है एवं स्वयं ही ज्ञान से युक्त है, तब वह ज्ञेयरूपा कैसे (कही जा सकती है? और यदि इसे) उसी रूप वाला (अर्थात् परामृश्य माना जाता है) तो वह (नील आदि की तरह) जड़ होगी।**

9. **(पूर्वोक्त शङ्का के समाधान में) कहा जाता है कि स्वात्मरूपा संविद् स्वभाव से ही स्वतन्त्र है। इस (संविद्) में न तो (अस्फुटत्वादि) कुछ अपास्य (अर्थात् त्याज्य) है न ही (स्फुटतमत्वादि कुछ) आधेय (अर्थात् जोड़ने योग्य) है - ऐसा पहले (अनुपाय आह्निक तन्त्रा, 218 में) कहा गया है।[5]**

संविद् में कुछ भी अपास्य और आधेय न होने पर उसका अस्फुटत्वादि रूप विस्फार कैसे हो सकता है?

10. **(परप्रमाता एक ही स्वभाव वाला है) फिर भी यह परमेश्वर अत्यन्त दुर्घट कार्यों को करने से स्वतन्त्र एवं शुद्ध होने से अपने स्वरूप को छिपाने की क्रीड़ा में प्रवीण है।**

परमेश्वर के अनावृत्त-स्वरूप को छिपाने वाली यही स्वतन्त्ररूपा माया नामक शक्ति है। इस शक्ति के कारण ही परमेश्वर ग्राह्य, ग्राहक आदि भेदों में अवभासित होता है।

11. **सर्व-व्यापी (परमेश्वर) के अनावृत्त-स्वरूप होने पर भी जो यह स्वरूप का प्रच्छादन है वही माया[6] है जिसके कारण विश्वरूप में अवभासन के स्वभाववाला यह भेद (अर्थात् द्वैत अवभासित होता) है।**

12. **उस महेश्वर का उस (विश्व) रूप में अवभासन ही द्वैत कहा गया है। उस द्वैत के हटाने से इस (आत्म साक्षात्कार-रूप) ज्ञान को माना जाता है।**

13. **कोविद इस दुर्भेद्य वृक्ष के मूल को सतर्क-रूपी तीक्ष्ण कुठार से काटते हैं - यह निश्चय है।**

ग्राह्य और ग्राहक में भेद समझना अथवा इन्हें भिन्न-भिन्न मानना ही शैव दर्शन में द्वैत-बुद्धि है। यही द्वैत-बुद्धि ज्ञाता के बन्ध का एक मात्र कारण है। इस द्वैत-बुद्धि को सम्पूर्णतः समाप्त करने के लिए सत्तर्क की अपेक्षा है। जयरथ के अनुसार सत्तर्क वह है जो सामान्य तर्कों से विलक्षण हो, परावस्था को प्राप्त हो चुका हो, शुद्ध विद्या के अंश के स्पर्श से पवित्र हुई बुद्धि में उदित हुआ हो तथा अपने स्वरूप का प्रत्यभिज्ञान कराने में समर्थ हो। मुमुक्षु को सत्तर्कों के द्वारा द्वैतबुद्धि का उन्मूलन तब तक करते रहना चाहिये जब तक वह समूल विच्छिन्न न हो जाये। जो मुमुक्षु इस उपाय में निरन्तर तल्लीन रहता है वही स्वयं को विकल्पों से विशुद्ध बनाता है और पराकाष्ठा को प्राप्त होता है।

14. **(महेश्वर से ऐक्यरूप) इस भावना को ही ज्ञानी सभी कामनाओं की पूर्ति करने वाली कहते हैं। यह मनोरथ के पद से भी दूर रहने वाली वस्तु को (स्वात्म से अभिन्न रूप में) प्रकाशित कर देती है।**

जिस मुमुक्षु को एक बार महेश्वर से ऐक्य की अनुभूति हो चुकी है उसके लिए फिर कोई वस्तु काम्य नहीं रहती अथवा इस भावना के कारण ही उसे सभी

अभीष्ट फलों की प्राप्ति हो जाती है। ऐक्य की यह भावना सत्तर्क से अनुभूति की जा सकती है। अतः पराकाष्ठा को प्राप्त तर्क को ही भावना कहा गया है।

15. **'श्रीपूर्वशास्त्र' में वह जो कहा गया है कि तर्क योग का उत्तम अङ्ग है, हेय (उपादेय आदि) के विचार से उसी (तर्क) में प्रयत्न करने की प्रशंसा की जाती है।**

छः योगाङ्ग माने गये हैं - प्राणायाम, प्रत्याहार, ध्यान, धारणा, तर्क और समाधि।' इन योगाङ्गों में तर्क ही सर्वोत्तम अङ्ग है क्योंकि उसी के द्वारा मुमुक्षु हेय और उपादेय वस्तुओं के विषय में निर्णय करके तत्वज्ञ बनता है।

16. **हेय विषयों की इच्छा करने के कारण जो चित्त अस्थिर हो रहा था उसे (तर्क) अन्य (स्वात्म) के प्रति स्थिर करता है। साथ ही उससे तब तक प्रेरित होता है जब तक अनामय स्थान को नहीं पहुँच जाता।**

क्षये शून्यं परं ज्ञेयं दीक्षा ह्येषा प्रकीर्तिता विवेक, 6.95 में उद्धृत

33. कृष्ण पक्ष में क्रूरकर्म तथा शुक्ल पक्ष में सौम्यकर्म करने का विधान हैः-

क्रूरकर्माणि तत्रैव कुर्वन्सिद्धिमवाप्नुयात्।
शुभकर्माणि कृष्णे च न च सिद्ध्यन्ति सुव्रते।। विवेक, 6.76 में उद्धृत.

34. इस सम्बन्ध में स्वतं, 7.62 पर उद्योत उल्लेखनीय हैः-

अथ ऊर्ध्वं च यत्तुट्यर्धं पूर्वमहोरात्रोदये पूर्वापरसंध्यात्वेनोक्तं, स एवेह विश्रमः पक्षसंधित्वेन कीर्तितः। यास्तु मध्ये पञ्चदश तुटयः, ता एव प्रतिपदाद्यास्तिथयः।।

35. प्रथमोदये हृत्पद्यातुट्यर्धं तु दिनं भवेत्।
द्वितीये चैव तुट्यर्धे यदा चरति शर्वरी।। स्वतं, 7.63,

हृत्पद्मादित्युपलक्षणम्। तेनैकैकस्यास्तुटेः सार्धपादांगुलपरिमाणमाद्यमर्धं दिनं प्रकाशरूपं, परं तु विश्रान्त्यात्मा रात्रिः। उद्योत, 7.63.

36. जाग्रदादि अवस्थाओं के सम्बन्ध में ईप्रका, 3.2.11-17 तथा उस पर विमर्शिनी द्रष्टव्य है।

37. वेद्यवेदकसाम्येन वस्तुविश्रमचर्वणम्।
यदा कदाचिद्भवति सा रात्रिदिनतुल्यता।।
विषुवत्कालयोगोऽसौ योगिभिः समुदाहृतः। विवेक, 6.84 में उद्धृत.

38. द्राघीयसी वेद्यवृत्तिर्दिनदैर्घ्याय कल्पते।
तथैव स्वात्मविश्रान्तिवृत्तिः स्याद्रात्रिविस्तरः।। विवेक, 6.86 में उद्धृत.

39. श्रीशम्भु से अभिनवगुप्त का अभिप्राय अर्धत्र्यम्बक मठिका के गुरु श्रीशम्भुनाथ से है जिनके सम्बन्ध में तंत्रा, 1.13 तथा निम्नलिखित श्लोक उल्लेखनीय है:-

इत्यागमं सकलशास्त्रमहानिधानाच्छ्रीशंभुनाथवदनादधिगम्य सम्यक्।
शास्त्रे रहस्यरससंततिसुन्दरेऽस्मिन् गम्भीरवाचि रचिता विवृतिमयेयम्।।

श्रीशम्भु का उल्लेख इन्होंने श्री भट्टनाथ (तंत्रा, 1.16) के रूप में भी किया है

श्रीभट्टनाथचरणाब्जयुगा तथा श्रीभट्टारिकांघ्रियुगलादुरुसन्ततिर्या।
बोधान्यपाशविषनुत्तदुपासनोत्थ बोधोज्ज्वलोऽभिनवगुप्त इदं करोति।।

40. मुद्रित संस्करण के अनुसार आगे 'उक्तं .... शिवरूपिणी' की संख्या 94 है अतः इसके पूर्व 'आप्यायनात्म .... प्राणार्कमाविशेत्' इस $1\frac{1}{2}$ कारिका को 93 कारिका के अन्तर्गत ही रखा गया है।

41. अत एव यैयममा सह यौगपद्येन पञ्चदशानां कलानां वसनात् 'अमावास्या' तद् व्यपदेश्येत्यर्थः। विवेक, 6.96.

42. स पक्षसन्धिः प्रतिपत्पञ्चदश्यैयिदन्तरम्। विवेक, 6.99 में उद्धृत.

43. रविबिम्बान्तरे देवि चन्द्रबिम्बं तदा भवेत्।
तदन्तरे भवेद्राहुरमृतार्थी वरानने।।
अमृतं स्रवतं चन्द्रो राहुश्च ग्रसते तु तत्।
पीत्वा त्यजति तद्बिम्बं तदा मुक्तः स उच्यते। स्वतं, 6.60-62.

44. राहुरादित्यचन्द्रौ च त्रय एते ग्रहा यदा।
दृश्यन्ते समवायेन तन्महाग्रहणं भवेत्।।
स कालः सर्वलोकानां महापुण्यतमो भवेत्। स्वतं, 7.73.

45. देखिये - स्वतं, 7.65.

46. द्रष्टव्य - वही, 7.77-79.

47. सूर्य की मकर, कुम्भ, मीन, मेष, वृष एवं मिथुन राशियों में संक्रान्ति क्रमशः माघ, फाल्गुन, चैत्र, वैशाख, ज्येष्ठ तथा आषाढ मास हैं। प्रत्येक राशि अथवा मास में सूर्य का संक्रमण छह अङ्गुल परिमाण का होता है। इस प्रकार सूर्य का संक्रमण छह राशियों में होने से छत्तीस अङ्गुल सूर्य द्वारा गति या भोग होता है। छह राशियों में सूर्य के इस गतिचार को उत्तरायण कहा जाता है।

षडंगुलं च संक्रामो मकरादिषु राशिषु।
भानोर्माघाद्याषाढान्तं भवेत्तच्चोत्तरायणम्।। विवेक, 6.114 में उद्धृत.

48. प्राणसूर्य के विभिन्न राशियों में संक्रान्ति के सम्बन्ध में स्वतं, 7.93-95:-

हृदयादुदयस्थानात्संक्रान्तिर्मकरे स्मृता।
षडङ्गुलान्यधस्त्यक्त्वा कुम्भे संक्रमते पुनः।।
कण्ठोर्ध्वे द्वयंगुलं त्यक्त्वा मीने संक्रमते पुनः।
गलोर्ध्वाद्यावत्ताल्वन्तं त्यक्त्वा मेषेऽथ संक्रमेत्।।
नासान्तं यावत्संक्रान्तिरंगुलानि षडैव हि।
एषा वै विषुसंक्रान्तिरुत्तरे संव्यवस्थिता।।

49. शक्त्यधो हृदये हंसः संक्रामेत्कर्कटे प्रिये।
षडंगुलानि संत्यज्य सिंहे वै संक्रमेत्पुनः।।
षडंगुलैः पुनस्त्यक्तैः कन्यां संक्रमते पुनः।।
नासिकाग्रात्तु ताल्वन्तं त्यक्ते वै विषुवद्भवेत्।।
तुलासंक्रान्तिरेषोक्ता दक्षिणं विषुवद्भवेत्। स्वतं, 7.112-14.

50. विवेक में उद्धृत प्रमाण के अनुसार किसी वस्तु की प्रथम छह स्थितियों के पर्याय निम्नाङ्कित हैं:-

'आधानमिच्छा संयोग आनन्दो घनता स्थितिः।'

शेष छह स्थितियों का उल्लेख तंत्रा में शब्दशः वही है:-

'जन्म सत्ता परिणतिर्वृद्धिर्ह्रासः क्षयः क्रमात्।'

51. अङ्गुले ह्यंगुले ह्यत्र तिथयः पञ्च संस्थिताः।
तस्याप्यर्धं दिनं पूर्वमपरार्धं निशा भवेत्।।
षट्पञ्चकास्तिथीनां ये तेऽहोरात्रास्तु मासिकाः।
त्रिंशता तैरहोरात्रैर्द्विपक्षो मास उच्यते।। स्वतं, 7.91-92.

मास	अधिष्ठातृदेवता	मास	अधिष्ठातृदेवता
कार्तिक	दक्ष	वैशाख	मन्मथ
मार्गशीर्ष	चण्ड	ज्येष्ठ	शकुनि
पौष	हर	आषाढ	सुमति
माघ	शौण्डी	श्रावण	नन्द
फाल्गुन	प्रमथ	भाद्रपद	गोपाल
चैत्र	भीम	आश्विन	पितामह

53. दक्षश्चण्डो हरः शौण्डी प्रमथो भीममन्मथौ।
शकुनिः सुमतिर्नन्दो गोपालश्च पितामहः।। तंत्रा, 33.8-9.

54. चन्द्रसूर्योपरागे च पक्षमासायनेषु च।
युगादिषु युगान्तेषु यच्च संवत्सरेऽप्यथ।।
वर्षद्वादशके चैव षष्ट्यब्देऽथ वरानने।
स्नानदानेन यज्ञैच पूजाहोमजपेन च।।
ध्यानयोगतपोभिश्च बाह्ये कालेऽथ यत्कृतम्।
अमुनोक्ते वरारोहे तत्फलं लभते महत्।।
प्राणहंसगतिं चारै ज्ञात्वैकस्मिंस्तु तद्भजेत्। स्वतं, 7.139-42.

55. उपर्युक्त कालगणना संक्षेपतः निम्नप्रकार है:-

6 प्राण	=	चषक
60 चषक	=	नाली
60 नाली	=	तिथि
30 तिथि	=	मास
12 मास	=	वत्सर
360 मानुष वर्ष	=	पित्र्य, दिव्यवर्ष
30 मानुष वर्ष	=	1 दिव्यमास
1 मानुष वर्ष	=	1 दिव्य अहोरात्र

56. अभिनवगुप्त दिव्य तथा पित्र्य वर्ष को एक समान मानते हैं तथा उनका खण्डन करते हैं जो पित्र्य वर्ष को दिव्य दिन मान लेते हैं। इस सम्बन्ध में क्षेमराज स्वतं, 11.8 पर उद्योत भी उल्लेखनीय है:-

इत्थं पित्रृणां देवानां च तुल्या अहोरात्रकलनेति पुराणपुस्तकेषु दृश्यते, अद्यतनैस्तु 'ऋतुर्द्विगुण एव सः' इत्यतोऽनन्तरं

'कृष्णपक्षस्त्वहश्चैव शुक्लस्तु रजनी भवेत्।
पित्रृणां सोऽप्यहोरात्रस्त्वनेनाब्दस्तु पूर्ववत्।।'

इति विपर्यास्य पठित्वा मानुष्यो मासः पित्र्योऽहोरात्र इति व्याख्यातं, तेषां च सांवत्सरिकी पितृदिनव्यवस्था लौकिक्यपि स्थितिः प्रसृता।

57. द्वादशाब्दसहस्राणि विज्ञेयं तु चतुर्युगम्।
चतुर्भिस्तु कृतं देवि सहस्रैस्तु यथाक्रमम्।।
त्रेता ज्ञेया त्रिभिर्देवि द्वाभ्यां वै द्वापरः स्मृतः।
सहस्रेणैव वर्षाणां विज्ञेयस्तु कलिः प्रिये।।
शतानि चत्वारि कृते त्वादिरन्तश्च कीर्त्यते।
त्रैते शतत्रयं ज्ञेयं द्वापरे तु शतद्वयम्।।
कलौ चापि शतं ज्ञेयं संध्यामानमिदं स्मृतम्। स्वतं, 11.209-12.

(क) प्रत्येक कल्प में चौदह मनु होते हैं। एक मनु का काल मन्वन्तर कहलाता है। मनुष्यों के नाम हैं:-स्वायंभुव, स्वारोचिष, औत्तमि, तामस, रैवत, चाक्षुष, वैवस्वत, सावर्णि, दक्षसावर्णि, ब्रह्मसावर्णि, धर्मसावर्णि, रुद्रसावर्णि, रौच्यदेवसावर्णि, इन्द्रसावर्णि। मनुस्मृति, 1.62-63,

(ख) मन्वन्तर के सम्बन्ध में लिङ्गपुराण भी उल्लेखनीय है:-
'एवं चतुर्युगाख्यानां साधिका होकसप्ततिः।
कृतत्रेतादियुक्तानां मनोरन्तरमुच्यते।।
दैविकानां युगानान्तु सहस्रं ब्रह्मणो दिनम्।
कृतत्रेतादियुक्तानां मनोरन्तरमुच्यते।।

(ग) मन्वन्तर के सम्बन्ध में मनुस्मृति 1.79 भी उल्लेख है:-
यत्प्राग्द्वादशसाहस्रमुदितं दैविकं युगम्।
तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते।।

(घ) लौकिक मान से चतुर्युग 4320000 वर्षों का होता है, जिसमें 1728000 वर्षों का कृतयुग, 1296000 का त्रेता, 864000 का द्वापर तथा 432000 वर्षों का कलियुग होता है। इस चतुर्युग की एक सप्तति से मन्वन्तर होता है। द्रष्टव्य - स्वतं, 11.213-219.

(ङ) विष्णुपुराण की ब्रह्म दिन के सम्बन्ध में यह निम्नाङ्कित है:-
कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम्।
प्रोच्यते तत्सहस्रं तु ब्रह्मणो दिवसो मुने।।

(च) इस सम्बन्ध में मनुस्मृति भी द्रष्टव्य है:-
दैविकानां युगानान्तु सहस्रं परिसंख्यया।
ब्राह्ममेकमहर्ज्ञेयं तावतीं रात्रिमेव च।।
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः।
रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः।।

60. पुराणों के अनुसार चौदह मन्वन्तरों के क्रमशः चौदह इन्द्र निम्नांकित हैं:-

यज्ञ, रोचन, सत्यजित्, त्रिशिख, विभु, मन्त्रद्रुम, पुरन्दर, बलि, श्रुत, शम्भु, वैधृत, ऋतधामा, दिवस्पति तथा शुचि। इस समय सातवां वैवस्वत मन्वन्तर चल रहा है जिसका इन्द्र पुरन्दर है।

61. अभिप्राय अस्पष्ट है। 'जनै' के स्थान पर 'जनाः' होना चाहिये।

62. मूल में 'तामसादितः' पद अस्पष्ट है। विवेक में उद्धृत स्वतं 11.247-49 के अनुसार प्रथम सृष्टि तामसी होती है। 'प्रथमां तामसी' सृष्टिं करोति तमसोत्कटान्।' तदनन्तर तमस् तथा रजस् से मनुष्यों की, रजस् तथा सत्व से मुनियों की तथा सत्व से देवादि की सृष्टि होती है। यह समग्र सृष्टि पूर्व की भाँति प्रत्येक प्रलय के अनन्तर होती रहती है-'सृजेद् देवान् सलोकांश्च पूर्वयैव व्यवस्थया' स्वच्छन्दतन्त्र की यह धारणा वैदिक धारणा (यथापूर्वमकल्पयत्) का अनुगमन है।

63. चौदह मन्वन्तरों का दिन तथा चौदह मन्वन्तरों की ही ब्रह्मा की रात्रि होती है। इस अहोरात्र के सौ वर्ष के बराबर विष्णु का एक दिन है जो ब्राह्म सौ वर्ष के बाद प्रारम्भ होता है। ब्राह्मवर्ष-मानार्थ द्र. स्वतं, 11.253-57.

64. एक रुद्र के दिनान्त में संहार और दिन के प्रारम्भ में ब्रह्मा की सृष्टि होती है। इस प्रकार एक रुद्र के एक वर्ष (360 दिनों) में जो तीन सौ साठ प्रलयोद्भव हुए उनकी शतरुद्र के सौ से गुणन करने पर 36000 प्रलयोद्भव ब्रह्मा के बनते हैं।

65. प्राधानिकपरार्धेन दशधा गुणितेन च।
माया संहरते सर्वं पुनश्चैव सृजेज्जगत्।।
मायाकालपरार्धस्य शतधा गुणितस्य च।
ईश्वरः कुरुते सृष्टिं संहरेच्च पुनः सृजेत्।। स्वतं, 11.299-300.

66. बिन्दुं चैवार्धचन्द्रं च भित्त्वा चैव निरोधिकाम्।
नादतत्त्वे लयं याति गृहीत्वा सचराचरम्।। स्वतं, 11.103.

67. नादः सौषुम्नमार्गेण भित्त्वा ब्रह्मबिलं प्रिये।
शक्तितत्त्वे लयं याति शक्तितत्त्वदिनक्षये।।स्वतं, 11.304.

68. शक्तिकालपरार्धस्य कोटिधा गुणितस्य च।
अनाश्रितस्य देवस्य दिनमेकं प्रकीर्तितम्।।स्वतं, 11.307.

69. अनेन परिमाणेन परार्धगुणितेन तु।
सोऽपि याति परं स्थानं कारणं समनाश्रयम्।। स्वतं, 11.308.

70. स कालः साम्यसंज्ञश्च जन्ममृत्युभयापहः।
तस्याप्यूर्ध्वममेयस्तु कालः स्यात्परमावधिः।।
नित्यो नित्योदितो देवि अकल्पश्च न कल्पते। स्वतं, 11.309.

71. 'स्वच्छन्दतंत्र' के अनेक विषयों का अनुवाद, संक्षेप आदि अभिनवगुप्त ने अपनी कारिकाओं में प्रस्तुत किया है किन्तु उनकी कारिकाओं में स्वच्छन्दतंत्र की अपेक्षा अस्पष्टता रह गई है। वस्तुतः अनेकत्र ऐसा लगता है कि स्वच्छन्दतन्त्र की भाषा अधिक सरल, निर्भ्रान्त तथा स्पष्ट है जबकि तन्त्रालोक की अस्पष्ट। उपर्युक्त कारिका भी, 131, 144, 146, 158, 164 आदि कारिकाओं की भाँति, अस्पष्ट है जबकि स्वच्छन्दतन्त्र की निम्नाङ्कित कारिका (11.310) अधिक स्पष्ट है :-

स चाधः कलयेत्सर्वं व्यापिन्यादिं धरावधिम्।
तुट्यादिभिः कलाभिश्च देव्यध्वानं चराचरम्।।

72. देखिये - स्वतं, 11.258-63.

73. निजशक्तिवैभवभरादण्डचतुष्टयमिदं विभागेन।
शक्तिर्माया प्रकृतिः पृथ्वी चेति प्रभावितं प्रभुणा।। उद्धृत पसा, 4.

74. श्रीकण्ठ एव परया मूर्त्या कालाग्निरुच्यते। विवेक, 1.171 में उद्धृत.

75. यह भी श्रीकण्ठ का ही स्वरूप भेद है। इस प्रकार समग्र अशुद्ध अध्वा अर्थात् मायातत्त्व तक की सृष्टि तथा संहार का अधिपति श्रीकण्ठनाथ को माना गया है।

76. 'रुद्रशतान्यष्टकपञ्चकम्' का अभिप्राय अस्पष्ट है। रुद्र के अष्टमूर्ति तथा पञ्च मुख होने के कारण क्या यह अर्थ सम्भव है कि 'अष्टमूर्ति एवं पञ्चमुख शतरुद्र'? अथवा सौ के स्थान पर 8x5=40 को मिलाकर 140 रुद्र मानने चाहिये?

77. ब्राह्मी च वैष्णवी शक्तिरधिकारपदं गता।
यं चाधितिष्ठत्यात्मानं तत्संज्ञां स प्रपद्यते।।
तदाधिकारं कुरुते इच्छया परमात्मनः। स्वतं, 11.267.

78. प्राणात्मा काल के समग्र भेद संविद् के ही अधीन हैं, उसी के स्वभाव का विलास किंवा स्पन्दन है।

79. कालतत्त्व क्रिया भेद है जैसे कि दिक्तत्त्व मूर्तिभेद है। यह तत्त्व परमेश्वर की इच्छा में विश्रान्त है। अतः इसका आन्तर स्वरूप निश्चित है किन्तु इसका बाह्य स्वरूप निश्चित नहीं है। इसीलिए एक की दृष्टि से यदि चषक (काल का एक विभाग) है तो दूसरे की दृष्टि से वही अब्दोदय है। इस प्रकार काल बाह्य दृष्टि से सापेक्ष है अतः अनिश्चित। महान् वैज्ञानिक आइन्स्टीन ने भी अपने सापेक्ष-

सिद्धान्त को सरल रूप में समझाने के लिए काल की प्रतीति को उदाहरण रूप में दिया था। प्रेम करने में और गरम तवे पर हाथ रखने में समय की अनुभूति भिन्न-भिन्न होती है।

80. जहाँ प्रथम स्वप्न को जागरण मानकर दूसरा स्वप्न होता है वह स्वप्न का स्वप्न कहलाता है।

81. ब्रह्मा, विष्णु, रुद्र, ईश्वर, सदाशिव, शिव इन छह में क्रमशः लय के बाद अन्त में पराशक्ति अथवा परम शिव में लय (समापत्ति) होता है।

82. इडा, पिङ्गला, सुषुम्ना, गान्धारी, हस्तिजिह्वा, पूषा, अर्यमा, अलम्बुसा, कुहू तथा शंखिनी (द्रष्टव्य - स्वतं, 7.15-16)।

83. द्वासप्ततिसहस्राणि नाड्यस्ताभ्यो विनिर्गताः।
पुनर्विनिर्गताश्चान्या आभ्योऽप्यन्याः पुनः पुनः।।स्वतं, 7.9.

84. आठ दिशाएँ निम्नाङ्कित हैं:-

पूर्वाग्नेयी दक्षिणा च नैर्ऋती पश्चिमा तथा,
वायवी चोत्तरेशानी दिशा अष्टाविमाः स्मृताः।

आठों दिशाओं के आठ दिक्पाल निम्नांकित हैं:-

इन्द्रो वह्निः पितृपतिः नैर्ऋतो वरुणो मरुत्,
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्। अमरकोश

(क) दक्षनासापुटे चैव नाडी वै पिङ्गला स्मृता।
इडा चैव तु वामेन सुषुम्ना मध्यतः स्थिता।। स्वतं, 7.148-49,

(ख) दक्षिणं तु स्थितः सूर्यो वामे सोमो विराजते।
पाके प्रकाशकत्वे च मध्यस्थश्चैव पावकः।।स्वतं, 7.153.

86. दशानां तु परं देवि नाडीत्रयमुदाहृतम्।
विन्दुनादात्मिके द्वे वै मध्ये शक्त्यात्मिका स्मृता।। स्वतं, 7.19.

87. वाह्ये चैव त्वहोरात्रे अध्यात्मं तु वरानने।
चतुर्विंशतिसंक्रान्तीः प्राणहंसस्तु संक्रमेत्।।

अहनि द्वादश प्रोक्ता रात्रौ वै द्वादशः स्मृताः। स्वतं, 7.167.68.

88. एक दिन में बारह संक्रान्तियाँ, राशियाँ होती हैं। प्रातः तथा सायं की मेष-संक्रान्ति सवा-सवा घड़ी की होती है। प्रातः के बाद और मध्याह्न से पूर्व पाँच और मध्याह्न से सायं के पूर्व तक वृषराशि से प्रारम्भ कर मीनराशि तक की

दश संक्रान्तियाँ होती हैं। इनमें से प्रत्येक संक्रान्ति ढाई घड़ी की होती है। इस प्रकार एक दिन में बारह संक्रान्तियाँ और तीस घड़ी (घटिका या नाली) होती हैं। इसी प्रकार तीस घटिका और बारह संक्रान्तियों की रात होती है। अतः एक अहोरात्र में चौबीस संक्रान्तियाँ और साठ घटिकाएँ होती हैं। प्रत्येक संक्रान्ति में नौ-सौ बार प्राणचार होता है। अतः चौबीस संक्रान्तियाँ के अहोरात्र में 900x24 = 21600 प्राणचार होते हैं।

इस सम्बन्ध में स्वतं, 7.162-65 द्रष्टव्य है।

89. पूर्वाह्ने विषुवत्वेकं मध्याह्ने तु द्वितीयकम्।
तृतीयं चापराह्ने वै अर्धरात्रे चतुर्थकम्।।
चतुर्धा विषुवत्प्रोक्तमहोरात्रेण मुक्तिदम्।। स्वतं 7.168-9.

90. अर्थात् जिस प्रकार तुटि से षष्ट्यब्द तक का काल प्राण अपान के चार में माना गया है उसी प्रकार समान में भी केवल वर्षद्वय का ही काल नहीं होता अपितु षष्ट्यब्द तक का काल उसमें भी माना गया है। प्राण तथा अपान के चार की अपेक्षा समानचार अत्यन्त सूक्ष्म है जबकि उसकी अपेक्षा प्राण अपान का संचार स्थूल है।

91. स्पन्दयत्यधरं वक्त्रं गात्रनेत्रप्रकोपनः।
उद्वेजयति मर्माणि उदानो नाम मारुतः।। आप्टे, संस्कृत-हिन्दी कोश.

92. अदेङ्गुणः 1.1.2, आद्गुणः 6.1.87.

93. वृद्धिरेचि 6.1.88, वृद्धिरादैच् 1.1.1.

94. 'षण्ठ्रणीनि' पद अस्पष्ट है।

95. सूक्ष्म भी तीन प्रकार का है-सूक्ष्मसूक्ष्म, सूक्ष्म, सूक्ष्मस्थूल। यहाँ सूक्ष्म से अभिप्राय सूक्ष्मसूक्ष्म से है।

(क) एकाशीतिपदा देवी या सा शक्तिः शिवात्मिका। मातं, 1.7.31,

(ख) मन्त्राश्च शक्तिगर्भस्थाः शक्तिर्वै पारमेश्वरी।
कालानलान्तमध्यानं शिवात् व्यामं यया मुने।।
एकाशीतिपदोपेता विद्यापादे मयोदिता।। विवेक में उद्धृत, मातं.

97. अस्पष्ट है।

98. अभिप्राय अस्पष्ट है।

99. अभिप्राय अस्पष्ट है।

100. अधः प्रवहणे सिद्धिर्हृत्पद्मं यावदागतः।
मुक्तिश्चैव भवेदूर्ध्वे परतत्त्वे तु सुव्रते।। स्वतं, 7.57.

101. प्रकाशस्यात्मविश्रान्तिरहंभावो हि कीर्तितः। अप्रसि, 22.

102. अर्थ अस्पष्ट है।

103. प्रतिसंक्रान्ति = 900 प्राणचार $1\frac{1}{2}$ =1350 प्राणचार

दिन में 12 संक्रान्ति का उदय=12x900=10,800 प्राणचार

रात्रि में 12 संक्रान्ति का उदय=12x900=10,800 प्राणचार

21,600 प्राणचार

इस गणना से इतने ही प्राणचार होते हैं।

104-105. अर्थ अस्पष्ट है।

106. यतः शास्त्रक्रमात्तज्ज्ञगुरुप्रज्ञानुशीलनात्।
आत्मप्रत्ययितं ज्ञानं पूर्णत्वाद् भैरवायते।। तंत्रा, 4.77.

परिशिष्ट

पारिभाषिक शब्द-सूची

(सूची के अन्तर्गत कोष्ठकगत संख्या तन्त्रा के भाष्यस से उसकी टीका विवेक को निर्दिष्ट करती है, जैसे कि (6.166) का अभिप्राय है तन्त्रा के षष्ठ आह्निक की 166 वीं कारिका की विवेक टीका। जहाँ अर्थ तन्त्रा से ही दिया गया है, वहाँ (तन्त्रा. 4.6) अङ्कित है।)

अकल्पः - कल्पयितुमशक्यः (6.166)

अकल्पितः (गुप्तः) - अयं खलु महज्ञानी भावनाऽनन्तोपायमाहात्म्यात् गुर्वादिना परेणाकृतत्वात् (अकल्पितः) (4.53)

अकल्पितकल्पकः - अकल्पितत्वेऽपि यस्य यथा स्वात्मज्ञानपारिपूर्ण्यात् भावनादिना कल्पितत्वमपि संभवेत् सः (4.72)

अकल्पितम् - तात्त्विकम् (5.26)

अकस्मात् - लोकप्रसिद्धो हेतुः (तंत्रा, 4.46)

अग्निः - भक्षयिता (4.134), रेफः (5.150)

अङ्गम् - आहुतिशोषकरणलक्षणभूतम् (4.50)

अद्वयः - चिन्मात्रस्वभावना (5.10) चिन्मात्रात्मा (6.104)

अद्वैतम् - प्रकाशमात्रविश्रमः (तंत्रा, 6.238)

अधिगमः - 'ज्ञानोत्थं यथार्थः' इत्येवंपर्यवसानः प्रमातृगश्वासः (4.82)

अधोवक्त्रम् - मस्तकोत्कलं योगिनीवक्त्रम् (6.193)

अध्वा - क्रमेण मानस्ये पदे संप्राप्तिकारणम् (तन्त्रा., 6.30) अध्वमध्या, अध्वन इति अध्वा (6.30)

अनवच्छिन्नम् - सूक्ष्मपाशकोशेनावृतम् (5.26)

अनाहता	-	प्रमातृप्रमेयाद्यात्मना सर्वतः प्रस्फुरन्ती (5.51)
अनुत्तरचक्रम् (आनुत्तरमम्)	-	प्रबुद्धस्याप्रबुद्धस्य वा स्वरसत एव चक्षुरादीन्द्रियवृत्तिद्वादशकं रूपाद्यार्थालोचनाय प्रसरद्वर्तते (5.27)
अनुचरम्	-	पारमार्थिकं रूपम् (5.19)
अन्तःकीलनम्	-	चित्तस्वरूपानुकारायमाणतया स्वात्मायत्ततासादनम्, दार्ढ्यापादनम् (4.92)
अणुः	-	संकुचितः प्रमाता (5.5)
अण्डचतुष्टयम्	-	शक्तिः, माया, प्रकृतिः, पृथ्वी च (तंत्रा. 6.170)
अपानः	-	आप्यायकारितया 'शशी' (5.48) अधः प्रवाहः (5.88)
अभिजित्	-	अभिजयति सर्वान्विघ्नानिति (6.68)
अभिषेकः	-	शास्त्रज्ञानादावधिकारः (4.53)
अम्बुजम्	-	भ्रूमध्यवर्ती विद्याकमलनामाधारः (5.55)
अरावः	-	अहंपरामर्शरूपः स्वात्मा (5.99)
अर्थवादः	-	स्तुतिनिन्दादिरूपः (4.236)
अविकल्पनम्	-	स्वात्माभेदेन परामर्शः (4.174)
अष्टारं चक्रम्	-	भैरवत्रयं, देवीत्रयं, कुलेश्वरः कुलेश्वरी च (4.130)
अहंकृत्	-	परमादित्यः (4.164) परस्मिन् प्रकाशे प्रथममुल्लसनशीलः अत एव व्यतिरिक्तविमृश्याभावात् स्वात्ममात्रपरामर्शनतत्परः अहंपरामर्शः (5.62)
आत्मप्रत्ययितं ज्ञानम्	-	शास्त्राधिगमक्रमेण शास्त्रज्ञगुरुप्रज्ञाया अनुशीलनाच्च 'इत्थमिदं नानित्थं' इत्येवंरूपात् पर्यालोचनात् ससंवादं सत् ज्ञानमात्मनि संजातप्रत्ययम् 'एवमैवैतत्, नान्यथा इत्येवं निश्चयोत्पादात् दार्ढ्यं (4.77-78)
आनन्दः	-	ब्रह्मरूपः (5.47) चिद्रूपः (5.49)
आनन्दमन्दिरम्	-	वरांगलक्षणम् (5.59)
आनन्दमयलिङ्गम्	-	स्पन्दनात्म योगिनीहृदयम् (5.121)
आणवः	-	अणुषु भेदिषूपायेषु भवः (5.८)

इच्छा - सद्गुरुप्राप्तिपर्यवसायिनी अनुग्रहरूपा (4.34)

ईश्वरः - बहिरुन्मेषलक्षणाद्विश्वावभासकारित्वाद्धेतोः, कालात्मनः क्रियाशक्तिरेवैतद्विश्वकलनात्मकत्वं बहिर्मुखं रूपम् (6.39) संयोजनवियोजनकारी (6.228)

उच्चारणम् - प्राणाद्या व्यानान्ता पञ्चवृत्तयः (5.18)

उत्तरायणम् - षडङ्गुलं च संक्रामो मकरादिषु राशिषु।
भानोर्माद्याषाढान्तं भवेत्तच्चोत्तरायणम् (6.114)

उदारः - निर्विकल्पकसमानकक्ष्यतया महान् (4.6)

उदासीनः - स्वात्ममात्रविश्रान्तैर्बहिर्मुखः (5.141)

उपपीठम् - देवीकोट्टादि (4.259)

उल्लासनम् - प्रमेयोन्मुखं प्रसरणम् (5.141)

ऊर्ध्वकुण्डली - द्वादशान्तः (5.111)

ऊर्ध्वपदम् - शक्तिशिवद्वादशान्तरूपम् (5.146)

ऊर्ध्वक्षेपः - प्राणः (5.88)

एकीकृतम् - संविन्मात्रात्मनावस्थापितम् (5.60)
स्वाभेदेनावस्थापितम् (5.144)

ओघत्रयः - बोध्यादयः षट् ज्येष्ठादिभेदभिन्नाज्ञानसंततयः (4.274)

औन्मुख्यम् - स्वस्वातंत्र्योत्थापितं ततदर्थक्रियाकारिणि भावजाते यदिदमिति विमर्शनं विशेषाख्यः स्पन्दः (5.81)

कन्दः - आनन्देन्द्रियम् (6.54)

कलना - परिच्छित्तिः (66)

कलाः - प्रमातृदिशा अंशाः (4.124)

कलितकलितः - [illegible] (तन्त्रा. 4.72-73)

करणम् - [illegible] (5.129)

करणानि - [illegible], [illegible], [illegible] बुद्धिश्च (तन्त्रा. 4.162)

कालः - [illegible] कालः [illegible] (4.132) [illegible] (4.166)

या नाम भावना कलना परिच्छितिः स एव क्रमाक्रमात्मा (कालः) (6.6) देवस्य विश्वाभासनकारिणी क्रियाशक्तिः (तन्त्रा, 6.38 विश्वकलनाकारी (6.166)

कालाग्निरुद्रकाली - परिमितप्रमात्रात्मनः कालाग्निरुद्रस्य कलनात् (4.168)

कालाध्वा - क्रियाभासनम् वर्णमन्त्रपदाभिख्यमत्रास्तेऽध्वत्रयं स्फुटम् (तन्त्रा, 6.34)

काली - पञ्चविधां कलनां कुर्वती परा देवी (तन्त्रा, 4.176) देवस्य पराशक्तिः (तन्त्रा., 6.7) (द्वादश-) सृष्टिकाली, रक्तकाली, स्थितिनाशकाली, यमकाली, संहारकाली, मृत्युकाली, रुद्रकाली, मार्तण्डकाली, परमार्क काली, कालानलरुद्रकाली, महाकालकाली, महाभैरवचण्डोग्रघोरकाली (4.173)

कुलदर्शनम् - अद्वयदर्शनम् (4.256)

कुलनायिका - कौलिकी शक्तिः (5.67)

कुलम् - स्वस्वरूपातिरेकायमाणतया उत्पत्स्यमानं प्रमातृप्रमेयात्म-विश्वम् (4.58) शरीरं (4.200)

कलावेशः - बाह्यशक्त्यभावेऽपि कुलस्य शाक्तस्य स्वरूपस्य आवेशः स्मरणपुरस्सरं भावनातिशयात् तन्मयीभावः (5.71)

क्रूरः - मुक्तिलक्षणः (6.237)

कौलम् - कुलदर्शनम् (4.257)

कौण्डिली - शक्तिद्वादशान्तः (5.145)

कौलिकसिद्धिः - कुले आत्मनि भवा येयं सिद्धिः (4.58)

क्षेत्रम् - मेलापस्थानम् (4.259)

गतिः - भाववृत्तिद्रव्यभूमिकादिरूपा (4.274)

गुह्यचक्रम् - जन्मस्थानाख्यं शक्तिव्यापिनीसमनात्मकारत्रययोगि विसर्गशब्दव्यपदेश्यम् (4.140)

ग्रास्यग्रासकौ - प्रमेयप्रमातारौ (6.108)

घरम् - षण्णां साधिकाराणां राजपुत्राणां भिन्नं भिन्नमाश्रयस्थानम् (4.267)

घूर्णिः	-	महाव्याप्तिः (तन्त्रा, 5.105)
चक्रम्	-	चक्षुरादीन्द्रियसंवित्तिरूपम् (5.32) मातृमानमेयस्वभावम् (5.76)
चतुर्दलम्	-	देवीत्रयं श्रीमातृसद्भावश्च (4.130)
चतुष्किका	-	ब्रह्मरन्ध्राधोवर्ती चतुष्पथरूपश्चिन्तामण्यभिधान आधारः (5.55)
चर्या	-	चर्यापादोक्त आचारः (4.264)
चर्वणम्	-	विश्रान्तिः (6.80)
चारः	-	ऊर्ध्वाधरवाहलक्षणः (6.23)
चित्	-	संवित्तिः (5.129)
जपः	-	अकृत्रिमैतद्हृदयारूढे यत्किंचिदाचरेत्, प्राण्याद्वा मृश्यते वापि स सर्वोऽस्य जपो मतः (तन्त्रा, 4.194), अकृतकाहंपरामर्श-विश्रान्तो हि योगी तदनुवेधेन यत्किंचिद्बाह्यव्यवहारयोग्यं व्याहरेत् सोऽस्य सर्वो जपः (4.194)
जीवः	-	जीवयति निखिलमिदं भूतजातं ज्ञानक्रिययोत्तेजनेन प्राणयतीति, पर प्रकाशः (4.242), प्राणबुद्ध्यादिप्रमातृरूपः (5.9)।
ज्येष्ठा	-	सुप्रबुद्धानां शिवमयी प्रभुशक्तिर्या ज्ञानकर्मणोः स्वातन्त्र्यलेशं तनुते (6.57)
तर्कः	-	शुद्धविद्यांशस्पर्शपवित्रिताया बुद्धेरुदीयमानःस्वात्मप्रत्यभिज्ञा घनपररूपः (4.13)। उत्तमं योगाङ्गम् (तन्त्रा, 4.15)
तत्त्वम्	-	भैरवमुद्रानुप्रवेशात्म पारमार्थिकं रूपम् (5.127)
तन्मयीभवनम्	-	सा अनुत्तरात्मनि प्राप्तिः पूर्णत्वस्य पराकाष्ठा (तन्त्रा., 4.209)
तपः	-	चान्द्रायणादि (4.264)
तमः	-	बौद्धपौंस्नत्वेन द्विप्रकारमज्ञानम् (4.68)
तामसाः	-	तमो बौद्ध-पौंस्नत्वेन द्विप्रकारमज्ञानम्, तत्र भवा ज्ञानशून्याः (4.68)

तुटिः - सचतुर्भागमङ्गुलयुग्मम् (6.64)
मानुषाक्षिनिमेषस्य अष्टमांशः क्षणः स्मृतः, क्षणद्वयं तुटिर्ज्ञेया तद् द्वयं तु लवः स्मृतः (स्वतं, 11.201) तुटयः षोडश-प्राणे पूर्वे हि कथिता मया, बाह्येनैव तु कालेन ते लवाः परिकीर्तिताः (स्वतं, 7.27) प्राणापानाश्रिते वाहे द्वात्रिंशत्तुटयः स्थिताः (6.65)

तेजः (अग्निः) - रेफः (5.146)

त्रिकदर्शनम् - परमाद्वयरूपम् (4.256)

त्रिधामानि - हृत्कण्ठोष्ठानि (5.144)

त्रिशूलभूमिः - नाडीत्रयसंघट्टात्मकत्वात् त्रिशूललक्षणा ब्रह्मरन्ध्रोर्ध्ववर्तिनी नाड्याधारा (5.55)

दण्डप्रयोगः - प्रबुद्धभावेनं दण्डाकारतासादनम् (5.55)

दशनाड्यः - इडा, पिंगला, सुषुम्ना, गान्धारी, हस्तिजिह्वा, पूषा, अर्यमा, अलम्बुसा, कुहू, शंखिनी (6.196)

दिनम् - सर्वथा तन्मयीभावः, यावद्वेद्यग्रहस्तावद्दिनम् (6.81)

दीक्षा - परसंविद्रूपतया प्रत्यवमर्शनम् (4.61) ज्ञानयोग-क्रियात्मिका, प्राणापानरूपौ सितासितौ परस्परव्यावृत्त्या वर्तमानौ दीर्घह्रस्वादिशब्दव्यपदेश्यौ शुभाशुभौ पक्षौ क्षीयते अपोहात्मविकल्परूपताघट्टनेन निर्विकल्पात्मपरसंविद्रूपत्वेन परिस्फुरतस्तदेव व्याप्त्या ध्यानेन योगेन च (6.75)

दीक्षितः - स्वसंवित्तिदेवीभिरेव पाशक्षपणपुरःसरं स्वात्मज्ञानपात्र-तायापादितः, अत एव स नित्यं योगी (4.50)

देशाध्वा - मूर्त्यवभासांशः। कलातत्त्वपुराभिख्यमन्तर्भूतमिह त्रयम् (तन्त्रा, 6.35)

दोषः - क्लेशभागित्वाद्यात्मा (4.66)

द्रव्याणि - अन्तर्बहीरूपाणि रत्नपञ्चकतत्प्रतिनिधिरूपकुंकुमाद्यात्मकानि यागसाधनभूतानि (5.63)

द्वादशकलाः - षष्ठवर्जमकारादिविसर्गान्ताः (5.63)

द्वादशान्तः - शक्तेरुदयविश्रान्तिस्थानम् (6.188)

द्वादशारं चक्रम् - श्रीसृष्टिकाल्यादिरूपम् (4.130)

द्वैतम् - परमेश्वरस्य विश्वरूपतयावभासनम् (4.11)

ध्यानम् - सोमसूर्याग्निसंघट्टात्म (5.22)

ना - पुमान् यकारः (5.150)

नागाः - अनन्ताद्याः अनन्तवासुकितक्षककार्कोटमह्मपद्मशंखकुलिकाः (6.69)

नाडीत्रितयम् - इडापिंगलासुषुम्नात्मकम् (6.198)। बिन्दु नादशक्त्यात्मकम् (स्वतं, 7.153)

नादः - अहंपरामर्शात्मा (4.181), सर्ववर्णाविभागस्वभावत्वादव्यक्तप्रायोऽनाहत रूपः (5.131)

नाददशा - विकस्वरा विमर्शात्मिका विश्वोत्तीर्णा संवित् (5.75)

नासिका शक्तिः - नसते कुटिलं गच्छति (6.61)।

नासिक्यः - शाक्तो द्वादशान्तः (6.61)

निमेषोन्मेषमात्रता - सदाशिवेश्वरदशा (6.167)

निरानन्दः - निजात्मप्रमातृसंमतादानन्दात् निष्क्रान्तः दशाविशेषः (5.47)

निरुपाधिः - निष्क्रान्ता भेदेन स्फुरिता मातृमानमेयात्मान उपाधयो यस्याः सा (5.49)

निरोधः - अन्तर्मुखरूपे विश्रमः (5.141)

निर्भरा - नान्याकांक्षा (4.9)

निर्विकल्पः - सर्वभावाविभेदावभासात्मा (5.15)

निर्वृत्तः - स्वात्ममात्रविश्रान्तः (5.47)

निशा - वैतृस्थता (स्वात्मविश्रान्तिः) (6.81)

निस्तरङ्गा - स्वात्ममात्रविश्रान्त्या शान्तरूपा (5.91)

नैशम् - मायीयम् (4.112)

पक्षसन्धिः - प्रथममर्धमावास्यं तत्संलग्नं द्वितीयं च प्रातिपदं तत्संलग्नं इत्यनयोरुभयोरर्धयोः संमेलनात् प्रतिपदमावस्यान्तरालभूतोऽसावेकतुट्यात्मा सन्धिः (6.99)

पतिः - निखिलस्य जन्मवतो जन्तुचक्रस्य पालनादियोगात् (4.56)

परमार्ककाली - अहंकारनाम्नः परमार्कस्य परिमिते कालाग्निरुद्रसंज्ञे प्रमातरि एवं कलनात् (4.167)

परमादित्यः - अहंकारः (4.164)

परमेश्वरः - परःप्रकाशः (4.10)

परं हृदयम् - योगिनीहृदयादिशब्दव्यपदेश्यमहंपरामर्शमयं संवित्स्पन्दात्मकं प्रकृष्टं सतत्त्वं तन्नरशक्ति-शिवाविभागवत्वादव्यक्तलिगङ्गम् (5.112)

परा - पूर्णा, अत एव शिवरूपिणी शक्तिमदवियुक्ता (6.94)

परा दशा - शून्यातिशून्यरूपं विश्रान्तिस्थानम् (6.10)

परामर्शः - शुद्धविद्यात्मा (4.114)

परावाक् - स्वरसोदितो ध्वनिः अहंपरामर्शात्मा नादः (4.181)

पल्ली - भिक्षास्थानम् (4.267)

पीठम् - कामरूपादि (4.259)

पुस्तम् - लेपादिनिर्मिताकृतिः (6.3)

पूजा - विभिन्नस्यापि रूपरसादेर्भावौघस्य देशकालाद्यनवच्छिन्न-निरुपाधिपूर्णपरसंविदात्मना संगतिः (एकाकारः) (4.121-22) संविदैकात्म्यैनावस्थानम् (4.181)

पूजोपकरणम् - यत्किंचिन्मानसाह्लादि यत्र क्वापीन्द्रियस्थितौ योज्यते ब्रह्मसद्धाम्नि पूजोपकरणं हि तत् (4.120-21)

प्रक्रियान्तः - शिवद्वादशान्तः (5.145)

प्रकृतिः - विश्वोत्पत्तिभूः संवित् (6.94)

प्रत्ययः - संकुचितप्रमातृव्यापारस्वभावो विकल्पात्मा (5.9)

प्रत्याहारः - अर्थेभ्यो रूपादिभ्यः प्रत्याहृतानां चक्षुरादीन्द्रियज्ञानानाम् अन्तः

कीलनम् चित्त स्वरूपानुकारामाणतया स्वात्मानत्ता-तासादनम् (4.92)

प्रमाणम् - प्रमातुरेव बहिर्मुखं रूपम् (4.124) भिन्नं प्रमेयं परीच्छिन्दत् (4.160)

प्रमातृप्रमेयौ - अग्नीषोमात्मकौ (4.130)

प्रलयः - विश्रान्तिः (4.91)

प्राणः - सामान्यस्पन्दनात्मा (त्रिविधः) पदमन्त्रवर्णात्मा (6.5), पारमेश्वरी शक्तिः (6.28), विश्वात्मता (तंत्रा, 6.45)

प्राणनाशक्तिः - आन्तरोद्योगरूपा जीवनापरपर्याया प्राणनामात्रस्वभावा (5.18)। (त्रिविधा) वामा, ज्येष्ठा, रौद्री। वामा संसारीणामीशा प्रभुशक्तिर्विधायिनी ज्येष्ठा तु सुप्रबुद्धीनां बुभुत्सूनां च रौद्रिका (तन्त्रा, 6.56)

प्राणापानौ - बिन्दुनादात्मकौ (6.221)

प्राणोदयः - हृदयात् द्वादशान्तं रेचकक्रमेणोदयः (5.47)

फुल्लम् - फकारः (5.146)

बन्धः - परस्या हि संविदः स्वस्वातंत्र्यात् गृहीतसंकोचाया देशाद्यवच्छिन्नत्वम्(4.92) आत्मन्यनात्माभिमानोऽ-नात्मन्यात्माभिमानश्च तदेव चाणवमलम् (5.105)

बहिः - इदन्तापरामृश्यः देहघटादिः (5.80)

ब्रह्मचारी - आनन्दरूपं ब्रह्म चरति- परं ब्रह्मैकात्म्येन प्रस्फुरति (4.139)

ब्राह्मी - परा शक्तिः (6.177)

बिन्दुः - वेदयिता स्वात्मा (5.150)

बिन्दुसत्ता - विदिक्रियाकर्तृत्वात्मिका परा परामर्शदशा (5.78)

भावना - तर्क एव हि परां काष्ठामुपगतो भावनेत्युच्यते (4.14)। सर्वकामदुधा, स्फुटयेद्वस्तु यापेतं मनोरथादपि (तन्त्रा., 4.14) अभ्यासः (5.103)

भेदः - ग्राह्यग्राहकाद्यात्मा (4.13)

किंचित् त्यक्त्वा किञ्चिदुपादीयत इत्येवमात्मा (4.262)

भेदनम् - बहिरुल्लसनम् (4.174)

भैरवः - निरुक्तदृष्ट्या सर्वंभ्रियाद्धारयति पुष्णाति रचयति अन्तर्बहिर्वा करोति सृष्टिस्थितिसंहारकृत् अखिले व्यापकः सकलजगत्क्रोडीकारेण भरितत्वात् पूर्णः (5.135)

भैरवगुरुः - यस्त्वकल्पितरूपोऽपि संवाददृढताकृते अन्यतो लब्धसंस्कारः स साक्षाद्भैरवो गुरुः (तन्त्रा, 4.76-77)

भैरवीयतेजः - संवित्स्वभावकम् (4.7)

भैरवीयमहाचक्रम् - चक्षुरादिसंवित्तिदेवीचक्रपरिवार्यमाणः पर-प्रमात्रात्मा चक्रेश्वरः (5.31)

भूबिन्दुः - भ्रूवि बिन्दुः (5.56)

मठिका - कुलं, गोत्रं गुरुसन्तानश्च (तन्त्रा, 4.265)

मतशास्त्राणि - समविषमलक्षणानि (4.262)

मध्यधाम - अग्नीषोमात्मकम् (5.72)

मण्डलम् - यागादि (4.50)

मन्त्रः - तद्धि स्मरणं वस्तुवृत्तेन मन्त्रयति स्वाभेदेन विश्वं परामृशति - इति मन्त्रः परः प्रमाता (5.137)

मरुत् - यकारः (5.150)

महाकाली - महाकालस्य कलनात् (4.170)

महाभैरवचण्डोग्रधोरकाली- प्रमातृपदेन महाभैरवशब्दस्य, मेयपदेन चण्डशब्दस्य, प्रमापदेनोग्रशब्दस्य, मानपदेन घोरशब्दस्य चाक्षेपात् 'महाभैरवचण्डोग्रघोरकाली' पूर्णतया परा परमेश्वरी (4.172)

महामूलम् - परमकारणत्वात् माया (5.60)

महाव्याप्तिः - परं पारमेश्वर्यम् (5.106)

महासाहसम् - चकितमुद्रानुप्रवेशः (5.85)

मातृसद्भावः - काल्यादिशब्दव्यपश्या पराभट्टारिका यथा सकलादिषु प्रमातृषु प्रमातृत्वं स्फुटीभवेत् (4.177)

मानमेयौ - सूर्यसोमात्मानौ प्राणापानौ (5.47)

माया - योनिः (4.131) अन्यापोहरूपत्वेन परस्परप्रतिक्षेपात् स्वरूपगोपनात्मिका पारमेश्वरी इच्छाशक्तिः (4.254)

मायापाशः - वामाख्या शक्तिः (4.33)

मायाशक्तिः - स्वातन्त्र्यरूपा शक्तिः यदनावृत्तमपि स्वं रूपमावृतत्वेनैव आभासयति (4.10) अनावृत्ते स्वरूपेऽपि यदात्माच्छादनं विभोः सैव माया (तन्त्रा, 4.11)

मार्तण्डकाली - संविद्देवी द्वादशसंख्यावच्छिन्नं बुद्ध्यादीन्द्रियमार्तण्डमण्डलं देहादावभिनिवेशात्कल्पितेऽहं कृतात्मनि कलयतीति (4.163)

मुखागमः - परतत्त्वप्रवेशोपायत्वात्गुरोः वचनम् (6.251)

मुग्धा - देहात्मनोविवेकमजानाना (6.15)

मुद्रा - कुले योगिन उद्रिक्तभैरवीयपरासवात् घूर्णितस्य स्थितिर्देहे मुद्रा या कांचिदेव सा (तन्त्रा, 4.200) न तु नियतकरादिनिर्वर्त्य संनिवेशादिरूपा (4.200)

मूर्तिः - गुर्वादिसंबन्धिनी (6.3)

मूर्तीश्वराः - क्षित्यादयो मूर्तयस्तदीश्वराः। शर्वो रुद्रस्तथा भीमो भव उग्रस्तथैव च। महादेवस्तथेशानो रुद्रलोकाधिपास्त्वमी। (स्वतं, 10.615-16)

मृत्युकाली - मृत्युरूपाया संविदः कलनात् (मृत्युकाली) (4.154)

यमकाली - यमं कलयन्तीति (4.151)

यमः - विकल्पः (4.151)

यन्त्रणा - इदमुपादेयमेव इदं त्याज्यमेव - इत्येवमात्मा (4.273)

योगः - युक्तिः (5.60)

योगाङ्गम् - हेयाद्यालोचनेन वस्तुपरिशुद्धिमादधानो हेयमपहाय उपादेये

विश्रामयेत् स (तर्कः) वरमुत्तमं योगस्याङ्गम् (4.17)

योगिनीहृदयम् - स्पन्दनात्मानन्दमयं लिङ्गम् (5.121)

योनिः - माया (4.131)

रक्तकाली - न चैषा चक्षुषा ग्राह्या न च सर्वेन्द्रियस्थिता। निर्गुणा निरहंकारा रंजयेद्विश्वमण्डलम्। सा कला तु यदुत्पन्ना सा ज्ञेया (रक्तकाली) (4.149)

रागः (तत्वम्) - सर्वविषयमभिलाषमात्रम् (4.17) स्वाभावाख्योऽशंकः (4.19) यद्यपि सामान्येन सर्वविषयाभिलाषमात्रमयत्वं नाम रागतत्त्वस्य स्वरूपं, तथापि नियतविषयोपारोहमन्तरेण तत् नाभिव्यक्तिमियात् (4.28)

रात्रिः - माया (4.132)

रावः - (दशात्मकः स्थूलः सूक्ष्मः परो हृद्यः कण्ठ्यस्तालव्य एव च सर्वतश्च विभुर्योऽसौ विभुत्वपददायकः (तंत्रा, 5.98)

राविणी - परवागात्मा विमर्शशक्तिस्तत्तद्रावरूपतया प्रस्फुरणात् (राविणी) (5.99)

रुद्रः - ममैतन्मा भूत इति रुणद्धि, प्रबोधाच्च किंचिद्रावयति, भोगेन स्वात्मसात्करोति इति रुद्रः (4.167)

रुद्रकाली (भद्रकाली) - रुद्धं भिन्नं वार्थं द्रावयेदिति (भेदस्य द्रावणाद्भद्रा भद्रसिद्धिकरीति) (4.158)

रौद्री (रौद्रिका) - रुजां द्रावयित्री अखिलकर्मणां च रोद्ध्री बुभुत्सूनां प्रभुशक्तिः या सांसारिकानन्दं कदाचित् वितरेत् (6.57)

लयः - स्वात्ममात्रविश्रान्तिः (6.230)

लिङ्गम् - सृष्टिसंहारकारणं लयादागमनाच्चाहुर्भावानां पदमव्ययम् (4.131)। त्रिविधम् - अव्यक्तम्- परैव संवित् (5.114) व्यक्ताव्यक्तम् - देहादावात्माभिमाने सत्यपि पुनरपरिम्लानः परतत्त्वान्तः समावेशः नरशक्तिरूपम् (5.115) व्यक्तम् - नरप्रधानम् मन्त्रवीर्यम् (5.115)

गुणीकृतपराद्वयरूपाहन्तापरामर्शं बहीरूपतया स्फुरत्

(5.116)

वर्णः - सर्ववर्णाविभागस्वभावत्वादव्यक्तप्रायो योऽसावनाहतरूपो नादः स वर्णोत्पत्तिनिमित्तत्वाद्वर्णः (5.131)

वर्णोदयः - अकारादीनां अर्थाद्धृदयाद्वादशान्तः (6.237)

वस्तु - पारमार्थिकं परप्रमात्रेकलक्षणं संविद्रूपम् (4.14)

वह्निः - भोक्ता (तन्त्रा, 4.166)

वामाद्या - प्राभव्य शक्तयः सृष्टिसंहारस्थित्यात्मिकाः (6.57)

वामा - संसारवमनात् वामा, संसाराविर्भाविका तिरोधानशक्तिः (4.2.06)

वाहकेली - कर्कशपांसुलश्चित्रो देशः यत्र कटकमण्डलादिना अश्वोह्यते (4.206)

विकल्पः - संशयः (4.61) इन्द्रियार्थाद्युपायनैरपेक्ष्येण अन्तरुल्लिखाताकारमात्रनिष्ठः इन्द्रियार्थाद्युपायको निर्विकल्पपृष्ठभावी अन्यो वा स्वभावपरामर्शः (4.110-11)। क्षेत्रज्ञव्यापारः चिदेकरूपत्वेऽपि अन्यापोहरूपत्वात् भेदमयः (5.5)। संकुचितस्य प्रमातुर्व्यापारः (5.15) भेदितस्य प्रमातृप्रमेयादेरर्थस्य परस्परापोहनात् 'इदमिदं नानिदम्', इति प्रतिनियततयावस्थापनात् संख्यानम् (4.174)

विकल्पसंस्कारः - अस्फुटः स्फुटितात्मकः प्रस्फुटन्स्फुटितात्मकः स्फुटतरः स्फुटमः (तन्त्रा, 4.45) अस्फुटत्वादिक्रमेण स्फुटतमत्वापत्तिपर्यन्तं पारमार्थिकस्वात्मप्रत्ययरूपनिर्विकल्पकज्ञानात्मत्वासादम् (5.5)

विकासः - संकोचाभावादभेदप्रथा (4.253)

विग्रहः - व्यस्तत्वम् (4.79)

विश्रिः - संवित् (6.80)

विधिवाक्यम् - विधिनिषेधात्मकम् (4.236)

विमर्शः - इच्छादिशक्तित्रयात्मा (4.187)

विमला - संकोचकलंकापहस्तनेन शुद्धा (4.6)

विलीनम् - संविन्मात्रात्मतामापन्नम् (5.77)

विविक्तं नभः - सकलभावशून्यत्वान्निरावरणम् (6.9)

विशुद्धम् - वेद्यताद्यकलंकितम् (5.11)

विषुवत् - विषुं व्याप्तिं साम्यमर्हति (6.115) व्याप्तौ विषेर्यतो वृत्तिः साम्यं च व्याप्तिरुच्यते, तदर्हति च यः कालो विषुवत्तदिहोदितः (तन्त्रा, 6.206)

विषुवद्वासरः - रात्रिन्दिनसाम्यात्मा मेषसंक्रान्तिदिनम् (6.203)

विसर्गः - विसिसृक्षात्मकं परं पारमेश्वरं रूपम् (5.57) कौलिकी शक्तिः (5.67) स्वातन्त्र्याख्या (5.124)

विसर्गक्षोभः - विसर्गस्य क्षोभः क्षोभाधारः कादिहान्तम् (5.67)

विसर्गप्रसरः - कादिहान्तस्य क्षोभाधारस्य प्रपञ्चः (5.67)

विसर्गानन्दः - मुख्यवृत्त्या चरमधातुप्रक्षेपात्मपरमसामरस्यम् (5.72)

विसर्गान्तपदम् - द्वादशान्तपदम् (5.87)

विसर्गोन्मेषः - योगिनीहृदयात्मा (5.73)

वेत्ता - विचारयिता (6.82)

वेदिता - ज्ञाता (6.82)

वैरिञ्चाः - ब्रह्मवादिनः (4.21)

वैसर्गिकम् - ऊर्ध्वकुण्डलिनीस्थानं बिन्दुद्वयं च (5.60)

व्यक्तलिङ्गम् - गुणीकृतपराद्वयरूपाहन्तापरामर्शम् बहीरूपतया स्फुरत् विशेषस्पन्दरूपम् विमर्शनम् (5.116) आत्माख्यम् प्रधानम् (तन्त्रा, 5.118)

व्यानाख्या - सर्वत्र व्यापकतयाननात्

व्याप्तिः - सार्वात्म्यप्रतिपत्तया सर्वाक्षेपकारिणी विकाससमाधिः (5.71)

शक्तिः - परस्य प्रकाशस्य कालेन योगः (6.7)

श्रीकण्ठः (अघोरः) - कालतत्त्वाधिपः, अव्यक्तस्थः, एककः सृष्टि-संहारकारकः

(6.172)

श्रीकालसंकर्षिणी - परा संविद्देवी कालकलनाकलंकग्रसिष्णुतया द्योतमाना (4.148)

श्रीपिण्डनाथः - रेफादिबिन्द्वन्तवर्णपञ्चकरूपः संहारहृदयम् (4.190-91)

श्रीमद्रक्ता - श्रीचण्डिका (4.64)

शिखाबन्धः - प्राणशक्तेः प्रतिचारमादिमध्यान्तेष्वधानेन पुनः पुनः परामर्शः (6.24)

शुद्धविद्या - शुद्धविद्या हि तन्त्रास्ति सत्यं यद्यन्न भासयेत् (तन्त्रा, 4.45)

शुद्धसंवित् - निरुपाधिः अनारुषिता निराभासा परा (4.125)

शुद्धा - प्रमात्रादिनियतरूपानारुषिता (4.148)

शून्यत्वम् - अनाश्रयः (तन्त्रा, 6.44)

शून्यरूपत्वम् - शून्यप्रमातृत्वम् (6.10)

शूलम् - इच्छादिशक्तित्रयमोकारश्च (5.60)

षोडशकलाः - अकाराद्या बुद्धीन्द्रियाद्याश्च (5.65)

सत्तर्कः - शुद्धविद्या (तन्त्रा. 4.34)

समयः - उत्तमवृद्धादिना कल्पितः इदमस्याभिधेयमित्येवमात्मकः (5.134)

समयाचारः - इदं कुर्यादिदं न कुर्यात् (4.262)

सहस्रारं चक्रम् - भूतभावभुवनादिरूपतयानन्तभेदं विश्वम् (4.133)

समाधिः - विश्वसाक्षात्कारात्मा (6.184)

समापत्तिः - सम्भोगः (5.124)

समीकृतिः - विषुवद्रूपावलम्बनेन मध्यधामानुप्रवेशनम् (5.55)

साम्यम् - रागद्वेषादिद्वन्दपरिहारः (5.144)

सांसिद्धिकः - स्वयं प्रवृत्ततर्कः संसिद्ध्या जन्मनागतः (4.40) अकल्पितो गुरुः (4.51) (भेदाः -) निर्भित्तिः, सद्भित्तिकः, सर्वगः, मुख्यांशगतः, अमुख्यांशगतः (तन्त्रा, 4.47-48) निर्भित्तिः

भित्तेर्निष्क्रान्तः, सहभित्तिकः - सह भित्त्या वर्तते सर्वामेव भित्तिं गतः स्यात् अंशेन वा। सोऽपि अंशगतः मुख्यांशनिष्ठितः स्यात् अन्यथा वा इति सहभित्तिकस्य त्रयो भेदाः निर्भित्तिना सह अस्य चत्वारः (4.48)

सिद्धिः - ऐहिक्यानन्दरूपा (4.139)

सिद्धिभाक् - जीवन्नेव मोक्षलक्षणां सिद्धिं भजमानः (4.50)

सुखम् - चमत्कारातिशयः (5.147)

सुधीः - पूर्णज्ञानी (5.71)

सुप्तः - अपवेद्यप्रलयाकलप्रायः (6.17)

सुषुम्ना - सर्वासामेव नाडीनां मध्ये या संव्यवस्थिता, सुषुम्ना नाम सा ज्ञेया नाभेः शक्त्याशिवंगता (स्वतं, 4.321)

सूक्ष्मरन्ध्राणि - गोलकरूपाणीन्द्रियद्वाराणि (5.65)

सूर्यः - ..... परसंविदात्मा प्रमाता तावत् भेदेन्धनदाहकत्वादग्निः स एव च अहंप्रतीतिमात्रस्वरूपः स्वस्वातन्त्र्यात् बुद्धीन्द्रिया-द्यात्मना द्वादशधा प्रस्फुरन् प्रमाणदशामधिशयानः सूर्यः इत्युच्यते प्रमाणम् (4.124)

सोमः - क्रियाशक्त्यात्मा (4.134) प्रमेयम् (4.124, 141)

सौधम् - सुधासमूहः (5.70)

सौधः - सुधाया आधारः सकारः (5.55)

सौधभूमिः - विश्रान्तिस्थानम् (5.70)

सौम्यम् - तत्तत्सिद्ध्यात्मनि भोगलक्षणम् (6.237)

संकोचः - भेदप्रथा (4.253)

संघट्टः - अन्योन्यमेलनात्मा (5.47) सामरस्यं (6.103)

संघातः - समस्तत्वम् (4.79)

संघर्षः - परस्परं मेलनात्मा संघट्टः (5.72)

संपुटः - परस्परमन्तर्बहीरूपतया मिलितानां दलानां संनिवेशः (5.21)

संप्लवः - एकस्मिन्नेवार्थेऽनेकप्रमाणप्रवृत्तिः (4.84)

संसारी - संकुचितः प्रमाता (4.56)

संस्कारः - पौनः पुन्येन श्रुतचिन्तादिवशात् अस्फुटत्वादि क्रमेण स्फुटतमत्वाद्यापत्तिपर्यन्तं गुणान्तराधानम् (4.2)। स्फुटतमविकल्पस्वरूपासादनात्मा (5.2)

संविच्चक्रम् - चक्षुरादीन्द्रियवृत्त्यात्म (5.33)

संवित् - इदमेव हि संविदः संवित्तत्त्वं, यत्सर्वमामृशतीति, अन्यथा हि अस्यास्तत्तदर्थोपरागेऽपि स्फटिकादिभ्यो वैलक्षण्यं न स्यात् (4.184)। नीलादिज्ञानं (5.76) यस्याः विमर्शः स्पन्दो हृदयं विसर्गः-इत्यादयः सहस्रशो व्यपदेशाः (5.77) अनुभवः (5.133)। तत्तनीलद्याभाससंभिन्ना परिमितात्मरूपा (6.180)

संहारः - स्वयमेव हि नाम भावानां संविद्विलीनतोत्पादनात्मा यद् बहीरूपताविलापनेन प्रमाणदशामधिशयानायां संविश्रावभेदेन परामर्शनम् (4.153)। क्षकारः (5.150)

संहारकाली - या निखिलेऽपि भावमण्डले संहृतिं कलयति (4.152)

संहारबीजम् - परप्रमात्रात्म (5.78)

स्थानभेदः - त्रिधा प्रोक्तः प्राणे, देहे बहिस्तथा (तन्त्रा, 6.2)

स्नानम् - उल्लसिबोधहुतभुग्दहथविश्वेन्धनोदिते सितभस्मनि देहस्य मज्जनम् (तन्त्रा, 116-7)

स्पन्दः - हृदये स्वविमर्शोऽसौ द्राविताशेषविश्वकः भावग्रहादिप--र्यन्तभावी सामान्यसंज्ञकः, स्वात्मन्युच्छलनात्मकः (तन्त्रा., 4.182-83) स्वात्मोच्छलनम् (5.57)। रिरंसया परस्परौन्मुख्यम् (5.70)

स्मरणम् - अनुभवप्रत्यभिज्ञादिप्रत्ययान्तरवैलक्षण्येनोज्जृम्भमाणं प्रत्यवमर्शनात्मकमनुभूतार्थप्रकाशासंप्रमोषणरूपम् तद्धिस्मरणं वस्तुवृत्तेन मन्त्रयति स्वाभेदेन विश्वं परामृशति (5.137)

प्राच्यस्यैव ह्यनुभवस्येदानीन्तनकालावच्छेदेन पुनरुन्मेषः (5.139)

स्वकलीला - स्वस्वातंत्र्यम् (4.138)

स्वसंवित्तिदेव्यः - स्वा आत्मीया याः संविश्रय इन्द्रियवृत्तयः ता एव प्रमात्रैका -त्म्यमभिद्योतयन्त्यो देव्यः (4.42)

स्वान्तःप्रचारः - इत्थमहमिदं वेद्मीत्याद्यात्म प्रकृष्टं चरणम् (5.127)

हंसः - हानसमादानधर्मा अग्निशब्दव्यपदिष्टः परप्रमाता (4.136)

हृदयं (हृत्) - तथ्यं रूपम् (4.181) स्वपरामर्शः (5.20) प्राणाद्युदय-विश्रामधाम (5.57) सृष्टाद्यात्म (5.52), बोधः पराबीजं च (5.60), परमं विश्रान्तिस्थानम् (5.73) (परं-) योगिनीहृदयादिशब्दव्यपदेश्यमहंपरामर्शमयं संवित्स्पन्द-नात्मकं प्रवृष्टं सतत्त्वं तन्त्ररशक्तिशिवाविभागवत्वादव्यक्त-लिंगम् (5.112)

शैवागम व तन्त्रालोक से सम्बद्ध कतिपय महत्त्वपूर्ण ग्रन्थ

1- डॉ. कान्तिचन्द्र पाण्डेय

- Abhinavagupt : An Historical and Philosophical Study, Choukhambha, Varanasi, 1936, 1963.
- Comparative Aesthetics, vol. 1 : Indian Aesthetics (in English), Choukhambha, Varanasi - 1950, 1959
- An outline of History of Shaiv Philosophy. MLBD, New Delhi - 1954
- स्वतन्त्रकलाशास्त्र, प्रथम भाग, 1967, द्वितीय भाग - 1975, चौखम्भा, वाराणसी
- सर्वदर्शनबिन्दु, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, 1968
- Doctrine of Divine Recognition, MLBD, New Delhi
- Commentry on the Bhaskari Isvara-pratyabhijna-vimarsini of Abhinavagupta by Bhaskarakantha), edited jointly with K.A.S. Iyer. Vols I, II, III, 1986.

2- प्रो. रामचन्द्र द्विवेदी

- ईश्वरप्रत्यभिज्ञाविमर्शिनी vol III, (सम्पादन), मोतीलाल बनारसीदास, दिल्ली - 1986.
- तन्त्रालोक (भाग 1-8) (प्रो. नवजीवन रस्तोगी के साथ सम्पादन) नेशनल पब्लिशिंग हाउस, दिल्ली 1989
- काश्मीर की शैव परम्परा, नेशनल पब्लिशिंग हाउस, नईदिल्ली 1989
- त्रिकदर्शनम्, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, 1992

3- प्रो. नवजीवन रस्तोगी

- Krama Tantricism of Kashmir Vol.- 1, MLBD, Delhi 1979 (Reprinted)
- Introduction to the Tantralok : A Study in Structure, MLBD, Delhi 1986 (Reprinted)
- The Tantraloka of Abhinavagupta with the Viveka of Jayaratha (edited in 8 volumes jointly with R.C. Dwivedi, MLBD, Delhi 1987 (Reprint)
- काश्मीर शिवाद्वयवाद की मूल अवधारणाएँ, मुंशीराम मनोहरलाल, दिल्ली 2002
- काश्मीर की शैव संस्कृति में कुल और क्रम मत, डी.के. प्रिन्टवर्ल्ड, दिल्ली 2011
- अभिनवगुप्त का तंत्रागमीय दर्शन, विश्वविद्यालय प्रकाशन, सागर 2012.
- Abhinava: Perspectives on Abhinavagupta (essays in memory of Prof. K.C. Pandey on Aesthetics and Kashmir Saivism) (Ed.) publisher : Munshiram Manohar Lal, Delhi, 2013.
- काश्मीर शिवाद्वयवाद में प्रमाणचिन्तन, लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिर, अहमदाबाद, 2013

4- प्रो. कौशल्यावल्ली

- A Peep into the Tantraloka and our cultural Heritage, Rashtriya Sanskrrit Sansthan, Delhi 1998.

5- आचार्य परमहंस मिश्र

- तन्त्रालोक, हिन्दी अनुवाद, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी

6- प्रो. लक्ष्मीनिधि शर्मा

- Kashmir Shaivism, Bhartiya Vidhya Prakashn, Varanasi, 1996.

7- प्रो. कमलाकर मिश्र

- Significance of the Tantric Tradition, Varanasi, 1981.
- Kashmir Shaivism : The Central Philosophy of Tantricism, U.S.A., 1993.

8- डॉ. कमलेश झा

- पूर्णताप्रत्यभिज्ञा (हिन्दी अनुवाद)
- संवित्स्वातन्त्र्यम् (हिन्दी अनुवाद)
- चिद्विमर्शः
- शिवतत्त्वविमर्शः
- आगम-संविद्, इण्डिका बुक्स वाराणसी, 2007

9- डॉ. राधेश्याम चतुर्वेदी

- तन्त्रालोक का विवेक सहित अनुवाद, चौखम्भा विद्याभवन, वाराणसी, 2002

10- प्रो. सूर्यप्रकाश व्यास

- बौद्ध, वेदान्त एवं काश्मीर शैवदर्शन,
  विवेक पब्लिकेशन्स, अलीगढ - 1986
- सिद्धित्रयी (अनुवाद), चौखम्भा संस्कृत संस्थान, वाराणसी, 1986.
- तन्त्रविमर्श, प्रथम भग, आर्यभाषा संस्थान, वाराणसी, 2005

11- प्रो. बीना अग्रवाल

- तन्त्रालोक में कर्मकाण्ड, प्रशान्त प्रकाशन, वाराणसी, 1995.

12- डॉ. गौतम चटर्जी

- Shritantraloka (Text with English Translation), Indica Books, 2008, 2011.

डॉ. सूर्यप्रकाश व्यास की अन्य रचनाएँ

1. बौद्ध, वेदान्त एवं काश्मीर शैव दर्शन, विवेक प्रकाशन, अलीगढ, 1986.
2. सिद्धित्रयी (अनुवाद और सम्पादन), चौखम्भा संस्कृत संस्थान, वाराणसी, 1986.
3. जातकमाला (अनुवाद और सम्पादन), चौखम्भा संस्कृत संस्थान, वाराणसी 1988.
4. आचार्य रतिनाथ झा रचनावली, (सम्पादक) राष्ट्रिय संस्कृत संस्थान, नईदिल्ली 2010.
5. बौद्ध प्रज्ञा-सिन्धु, खण्ड - 5,8, (सहसम्पादक) न्यू भारतीय बुक कॉरपोरेशन, नई दिल्ली, 2011, 2014
6. बौद्धविमर्श, (सम्पादन) बौद्ध अध्ययन केन्द्र, चेतगंज, वाराणसी 2011
7. आचार्य रामचन्द्र द्विवेदी रचनावली, (सम्पादन) राष्ट्रिय संस्कृत संस्थान, दिल्ली 2012.
8. ढलता सूरज, (कविता संग्रह), आर्यभाषा संस्थान, वाराणसी 2015
9.-10. श्रीमती ओमवती शर्मा और जनसेवा ट्रस्ट (लेखन, सम्पादन) 2015, 2016.
11. जीवन-मधु, (लेखन, सम्पादन) श्रीमती ओमवती शर्मा जनसेवा ट्रस्ट, निम्बाहेड़ा (राजस्थान) 2016.
12. तन्त्र-विमर्श भाग-2 (प्रकाशनाधीन)

डॉ. श्रीमती कमला द्विवेदी

- **जन्म**
  08 मई, 1941, बिल्हौर, उ.प्र.
- **माता पिता–**
  श्री बाबूराम, श्रीमती हँसमुख देवी
- **पति**
  प्रो. रामचन्द्र द्विवेदी
- **शिक्षा**
  - एम.ए. (संस्कृत) -1972,
  - पीएच.डी–1977,

  मोहनलाल सुखाड़िया विश्वविद्यालय, उदयपुर
- **शिक्षण**
  व्याख्याता एवम् उपाचार्य संस्कृत विभाग, राजस्थान विश्वविद्यालय, जयपुर
- **प्रमुख प्रकाशन**
  - अभिनवगुप्तप्रणीत परमार्थसार (सटिप्पण अनुवाद) 1975
  - तन्त्रालोक (आह्निक 4-6) सानुवाद विवेचन
- **शिवसायुज्य**
  31 जुलाई, 1995

आचार्य रामचन्द्र द्विवेदी स्मृति ग्रन्थमाला

1. **कालिदास के काव्य में सादृश्येतर अलङ्कार**
   लेखक : डॉ. विष्णुराम नागर, सम्पादक डॉ. सूर्यप्रकाश व्यास,
   प्रशान्त प्रकाशन, वाराणसी, 1995
2. **तन्त्रालोक में कर्मकाण्ड**
   लेखिका: डॉ. बीना अग्रवाल, प्रशान्त प्रकाशन, वाराणसी, 1995
3. **सांख्य एवं काश्मीर शैव दर्शन में सृष्टि**
   लेखक : डॉ. विजयशंकर द्विवेदी, सम्पादक [illegible] शर्मा,
   प्रशान्त प्रकाशन, वाराणसी 1997
4. **उन्मीलनम् (पं. बटुकनाथ शास्त्री [illegible])**
   सम्पादकः डॉ. सूर्यप्रकाश व्यास, प्रशान्त [illegible] वाराणसी, 1998
5. **बौद्धाचार्य वसुबन्धु**
   लेखकः डॉ. मुनिराम तिवारी, सम्पादक [illegible] व्यास,
   प्रशान्त प्रकाशन, वाराणसी, 1999
6. **मेदपाट–मण्डन पं. गिरिधरलाल शास्त्री**
   लेखकः डॉ. यशवन्त कुमार जोशी, सम्पा[illegible] प्रकाश व्यास,
   प्रशान्त प्रकाशन, वाराणसी, 1999
7. **दर्शन–कणिका**
   लेखकः डॉ. सूर्यप्रकाश व्यास, प्रशान्त प्रकाशन, वाराणसी, 2002
8. **बौद्ध–सुभाषित**
   संकलनकर्ता : डॉ. सूर्यप्रकाश व्यास, आर्यभाषा संस्थान, वाराणसी, 2003
9. **बौद्ध शैक्षिक मूल्य**
   लेखिकाः डॉ. मीना शर्मा, सम्पादक डॉ. सूर्यप्रकाश व्यास, आर्यभाषा संस्थान, वाराणसी, 2004
10. **अभ्युदय (लाल राजेन्द्र बहादुर सिंह अभिनन्दन–ग्रन्थ)**
    सम्पादक : डॉ. सूर्यप्रकाश व्यास, प्रकाशक डॉ. अमलधारी सिंह, बैसवाडा, 2004
11. **वेदान्त में बौद्ध सन्दर्भ**
    लेखिकाः डॉ. अनामिका सिंह, आर्यभाषा संस्थान, वाराणसी, 2005
12. **आचार्यवसुबन्धुप्रणीते पञ्चस्कन्धप्रकरणं त्रिस्वभावनिर्देशश्च**
    अनुवादिका डॉ. अनामिका सिंह, आर्यभाषा संस्थान, वाराणसी, 2005
13. **दर्शनमञ्जूषा**
    लेखिकाः डॉ. अनामिका सिंह, आर्यभाषा संस्थान, वाराणसी, 2005
14. **तन्त्रविमर्श**
    सम्पादकः डॉ. सूर्यप्रकाश व्यास, आर्यभाषा संस्थान, वाराणसी, 2005
15. **नव्यान्तर्विभाग**
    लेखिका: डॉ. अनामिका सिंह, आर्यभाषा संस्थान, वाराणसी, 2007
16. **सौम्य-पथ**
    लेखक एवं सम्पादक : डॉ. सूर्यप्रकाश व्यास, आर्यभाषा संस्थान, वाराणसी, 2011
17. **बोधबिन्दु**
    लेखकः डॉ. सूर्यप्रकाश व्यास, आर्यभाषा संस्थान, वाराणसी, 2012
18. **नेपाल में बौद्ध मत**
    लेखकः मार्की शेर्पा, सम्पादक डॉ. सूर्यप्रकाश व्यास, आर्यभाषा संस्थान, वाराणसी, 2015
19. **दर्शन-मकरन्द**
    लेखकः डॉ. सूर्यप्रकाश व्यास, ऋषि-मुनि प्रकाशन, उज्जैन, 2016
20. **विदुषां पत्राणि**
    सम्पादकः डॉ. सूर्यप्रकाश व्यास, आर्यभाषा संस्थान, वाराणसी, 2016
21. **तन्त्रालोक (आह्निक 4–6)**
    लेखिका डॉ. कमला द्विवेदी, सम्पादक डॉ. सूर्यप्रकाश व्यास,